॥ ओ३म् ॥
केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रो ज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालकृता मूर्धजा:।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।19।।
( नीतिशतकम् )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484
सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकारी यशस्सुखकरी विद्या गुरूणां गुरु:।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूजिता न तु धनं विद्याविहीन: पशु:।।20।।
( नीतिशतकम् )

卐 वर्षम्-८ 卐 अंक:-२४ ( १९२ ) 卐 १६ जून: २०१९ त: ३० जूनमास: २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७६ 卐 सृष्टिसंवत्-१,९६,०८,५३,११७ 卐 पृष्ठम्-८

## श्रीआनन्दरामायणमहाकाव्यस्य लोकार्पणम्

नवदेहली। देववाणीपरिषद दिल्लीमाध्यमेनयोजित एकस्मिन् भव्यसमारोहे आनंदरामायणस्य लोकार्पणं सुसम्पन्नो जात:। आग्लभाषा एवं साहित्यस्य सेवानिवृत आचार्य प्रो. गिरीन्द्रमोहनझा माध्यमेन् विरचित ग्रन्थस्य विमोचन समये पद्मश्री रमाकान्तशुक्ल: उक्तवान् यत् यत्र हिन्दीभाषायां महाकाव्यस्य रचना प्रायस: अवरुद्ध अस्ति तत्र आनन्दरामायणमहाकाव्यस्य रचना एवं प्रो.झा महोदयस्य आदम्य साहसं




प्रदर्शयति। कार्यक्रमस्य स्वागताध्यक्ष प्रो. सुधीकान्तभारद्वाज: आनन्दरामायणस्य साहित्यस्य प्रशंसा कृत्वा कविवरस्य सृजनात्मकताया: प्रशंसा कृतवान्। श्रीनाथमलशास्त्री अपि झा महोदयस्य प्रशंसा कृतवान्। अस्य ग्रन्थस्य लोकार्पण कार्यक्रमे बहु गणमान्य जना: आसन्। विशिष्टातिथि रूपे सेन्टस्टीफनमहाविद्यालयस्य प्राध्यापक डॉ. चन्द्रभूषणझा, प्रत्यक्षभारतस्य सम्पादक शशिधरशुक्ल: स्वोदगारं व्यक्तवन्तौ। प्रो. रमाशुक्ला जनान् रामायणं प्रतिप्रेरितं कृतवती।

## संस्कृतभारत्या: शोभायात्राकार्यक्रमे संस्कृते अभवत् उद्घोष:

गढ़ीबोलनीमागीस्थित सोमानीमहाविद्यालये दसदिवसीय संस्कृतसंभाषण शिविरस्य अष्टामदिने संस्कृतशोभायात्राया: आयोजनमभवत्। संस्कृतभारत्या: अस्यां शोभायायात्रां सहस्त्र संस्कृत जिज्ञासु




भागं गृहीतवन्त:। शोभायात्रायां विधायक रणधीरसिंह अपि आसीत्। शोभायात्रायां जना: आनन्देन संस्कृतस्य महत्ताया: वर्णनं करोति स्म एवं जयतु संस्कृतं जयतु भारतम् इत्यूद्धोषोऽपि प्रचलति स्म। वर्गाधिकारी रूपचंदयादव: शोभायात्रायां अग्रे आसीत्। यात्राया: शुभारम्य: संघसंचालक अजयमित्तल: कृतवान्। रजधीरसिंह संस्कृतस्य महत्ताया: वर्णनं कृत्वा अस्या: उपयोगिताया: विषये अपि उक्तवान्। तत्र जिलाप्रभारी डॉ. नागेन्द्र:, रूपचंदयादव: पुष्पेन्द्रअत्रे, प्रवेशकौशिक: सत्येन्द्रकुमार: राजकुमार सहितं अन्य गणमान्य जना: उपस्थिता: आसन्।

## संस्कृतं भविष्यति विश्वभाषा–आचार्यबालकृष्ण:



हरिद्वारम्। जिनेवायां संयुक्तराष्ट्रसंघस्य मंचे प्रथमवासरेव संस्कृते भाषणं दत्वा पतंजलीयोगपीठस्य महामंत्री आचार्यबालकृष्ण: स्वदेशमागतम्। ते उक्तवन्त: यत् विश्वस्य कस्यापि मंचे प्रथमवारेव संस्कृते भाषणं करणाय तं संस्कृते गर्वमस्ति। इयं भाषां विश्वभाषा निर्माणे पतंजलिवि.वि. कार्यं करिष्यति। तत्र प्राप्त पुरस्कार: ते योग एवं आयूर्वेदं समर्पितम्। तत्र उद्घाटनसत्रेप्रथम उद्बोधनार्थं तं आहूतवान्। तत्र इत: पूर्व प्रथमोद्बोधनं हिन्दां तत्कालीन विदेशमंत्री अटलविहारीवाजपेयी दत्तवान्। एतदर्थं बालकृष्णं नियमानुसारं दसनियेषं दत्तवान्। विश्वमंचे प्रथमसंस्कृत भाषणकर्ता सैवअभवत्। आंग्लभाषायां स्वामीविवेकानन्द: दत्तवान् आसीत्। बालकृष्ण: उक्तवान् यत् पतंजलीयोगपीठ: भारतस्य प्राचीनविधा, लिपि, पाण्डुलिपि एवञ्च संस्कृत विषये कार्यं करोति। तेन् सह संस्थानस्य अनुसन्धानशालायामपि प्राचीनग्रन्थं विश्वस्य आधुनिकी भाषायां प्रकाशनस्य कार्यमपि प्रचलितमस्ति।

## योगस्य प्रसारार्थं पुरस्कारस्य पात्रोमस्ति मीडिया–जावड़ेकर:



नवदेहली। केन्द्रीयपर्यावरणमंत्री प्रकाशजावड़ेकर: उक्तवान यत् योगस्य माध्यमेन् स्वस्थजीवनं प्रोत्साहनार्थं मीडिया जनान् पुरस्कृत करणार्थं सर्वकार: चिन्तिवान्। समाचारपत्रसंगठनम्, टीवी एवं रेडियो इत्येषां 11-11 पुरस्कार: दाष्यति। अन्ताराष्ट्रिययोगादिवसपुरस्काराय 10त: 25 जून पर्यन्तं विचार: भविष्यति। ते उक्तवन्त: यत् योग: सम्पूर्ण विश्वाय भारतस्य उपकारोऽस्ति। यदा प्रधानमंत्री मोदी 21 जूनमासे अन्तराष्ट्रिययोगदिवसाय संयुक्तराष्ट्रे उक्तवान तदा ते सकारात्मक प्रतिक्रिया दत्तवन्त:। मीडिया अपि स्व प्रचार-प्रसार माध्यमेन स्वस्थ जीवनार्थं सर्वं प्रेरितवन्त: अत: ते अपि पुरस्कारास्य पात्रोऽस्ति। एवं युजीसी अपि योगदिवसे आभारतस्य विश्वविद्यालये योगप्रशिक्षणार्थ आदिशवन्त:। युजीसी इत्यस्य सचिव प्रो. रजनीशजैन: सर्वं कुलपतिजनान् एतत्सम्वन्धि पत्रं प्रेषितवान्।

## संस्कृतं सर्वाषां भाषाणां जननी-डॉ. वाचस्पति:

मेरठ। संस्कृतं सर्वाषां भाषाणां जननीस्ति। संस्कृतस्य शब्द: अन्याषो भाषायामपि मिलिष्यति। यथा-पद इत्यस्य पेडल, दंत: डेंटल इत्यादि। संस्कृतभाषयापेक्षा जीवनस्य विकास: सम्भवो नास्ति। इयं




भाषा मानवे मानवताया: स्थानं सुरक्षिंत कृतवान्। सम्पूर्ण विश्वाय इयं प्रेरणादायकोऽस्ति। एतत्सर्वं उत्तरप्रदेशसंस्कृतसंस्थानाध्यक्ष डॉ. वाचस्पति मिश्र: संस्कृतभारत्या: आवासीयशिविरे उक्तवान्। सीएमओ डॉ. राजकुमार: उक्तवान् यत् अस्माकं सर्वं शास्त्रं संस्कृतेस्ति। अस्यायु: सहस्त्रवर्षात्मकस्ति। मेरठमहाविद्यालयस्य वाणिज्यविभागाचार्य संतराम: उक्तवान् यत् वर्तमानसमये वैदिशिकजनोऽपि संस्कृताध्यायनं करोति। विदेशेषु गीता, रामायणं, वेदादिना अध्ययनं भवति।

## चायविक्रेतायाः पुत्रः अभवत् संस्कृतबोर्डपरिक्षायां सर्वश्रेष्ठः



नैनीताल। स्व परिश्रम, लगनशीलतायाः बलेन् पहाड्पानीनगरस्य उष्णोदक विक्रेतायाः पुत्रः उत्तराखण्ड-शिक्षापरिषद 2019 इत्यस्य पूर्वमध्यमाद्वितीयवर्षस्य परीक्षायां सर्वोत्कृष्ट स्थानं प्राप्य गौरवन्वितं कृतवान्। तस्य पित्र स्वग्रामे एव उष्णोदकस्य आपणे अस्ति। माता गृहणी अस्ति। तत्र सर्वे तं शुभकामना दत्तवान्।

## संस्कृताध्ययनकर्तृच्छात्राणां अधिकाधिकविकासः भवति

भोपाल। जनाः कथयन्ति संस्कृतं रोजगारस्य भाषा नास्ति। अस्याध्ययनं किमर्थम्। अहं जनामि सम्पूर्णविश्वे संस्कृततस्य



वार्षिक व्यवसायः 150 विलियनडॉलरस्यास्ति। एषु 10 तः 15 विलियन डॉलरस्य व्यवसायः विवाह एवं पूजापाठादि कार्येन् भवति। एतत्सर्वं युएसए इत्यस्य विजिटिंग प्रो. बलरामसिंहः विश्वविद्यालय पक्षतः प्रशासनअकादमी सभागारे तत्वबोधिनी व्याख्यानमालायां संस्कृत एवं विज्ञान विषये उक्तवान्। ते उक्तवन्तः यत् युएसए इत्यस्य एकः वैज्ञानिकः शोधपत्रे लिखितवान् यत् संगणकयन्त्रस्य उपयोगाय संस्कृतभाषा सर्वोत्तमा भाषाऽस्ति। परञ्च भारते अस्योपरि कार्यं न भवति। अस्यकारणमस्ति प्रायभः भारतं अस्योपरि अभिमानमस्ति।


खादी वस्त्र ही नहीं, विचार है !

आदर्श ग्रामोद्योग समिति, दिल्ली

खादी वस्त्रों का विशाल भण्डार

✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड ) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी

सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद, अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।

खादी ग्रामोद्योग भवन

✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ0 प्र0)

✪ शेरपुर चौक, करावल नगर, दिल्ली-110094

फोन:-0120-2631855, 9899334204



ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

सत्यार्थ प्रकाश

सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट

427, मन्दिर वाली गली, नया बांस, दिल्ली-6

Ph.:011-43781191, 09650622778

E-mail: aspt.india@gmail.com


# प्रत्येकं विद्यालये एवं महाविद्यालये भविष्यति संस्कृतम्

शिमला। प्रत्येकस्मिन् विद्यालये एवं महाविद्यालये संस्कृत भविष्यति। एतदर्थं तत्र शिक्षकानां नियुक्ति भविष्यति। हिमाचलकलासंस्कृतभाषाअकादमी माध्यमेनायोजित संस्कृतसम्मेलनस्यावसरे शिक्षा, विधि एवं कार्यमंत्री सुरेशभारद्वाजः विचारोऽयं व्यक्तवान्। ते उक्तवन्तः यत् प्रदेशे संस्कृतविश्वविद्यालयस्य स्थापना भविष्यति इति सर्वकारस्य इच्छा वर्तते। प्रदेशे विद्यालये एवं महाविद्यालये संस्कृतं भविष्यति अस्मिन विषये सर्वकारः विचारः करोति। आवश्यकतानुरूपं



अनुवादकानामेवं शिक्षकानां नियूक्ति विषयेऽपि चर्चा प्रचलति। अस्मिन्नवसरे मुख्यातिथि स्वोद्बोधने संस्कृतं भारतीय सभ्यता, इतिहासः, संस्कृति एवं जनजीवनस्य जीवन्त शास्त्रमुक्तवान्। अतः संस्कृतस्य प्रचार-प्रसारं करणीयम्। कार्यक्रमे संस्कृतभारत्याः क्षेत्रीयसंगठनमंत्री जयप्रकाशगौतमः उक्तवान् यत् संस्कृतभाषा वैज्ञानिकी एवं संगणकाय उपयोगी वर्तते।

## भारतीयसंस्कृतेः प्राणवायुरस्ति संस्कृतम्

मेरठ। संस्कृत भारतीय संस्कृतेः प्राणवायुरस्थि। भारतीयसंस्कृतेः अवगमनार्थं संस्कृतस्य ज्ञानं भवितव्यम् इत्यं संस्कृतभारत्याः शिविरे सीसीएसयुइत्यस्य कुलपति प्रो. वाईविमला उद्घाटनवसरे उक्तवती। सा उक्तवती संस्कृत भाषा अतिप्राचीना वर्तते एतदर्थं अस्याः प्रयोगः सर्वत्र भवितव्या। द्वितीयसत्रे संघस्य क्षेत्रीयप्रचारप्रमुख पद्मकुमारः उक्तवान



यत् चितायाः विषयोऽस्ति यत् भारतस्यापेक्षया विदेशे संस्कृतस्य प्रयोगः अधिकमस्ति। वयं सर्वत्र गत्वा अस्याः महत्वं विषये सामान्य जनान् कथयन्तु। तत्र प्रांतसंगठनमंत्री नरेन्द्रकुमारपांडेय, डॉ. धर्मेन्द्रकुमारः, अमित कुमार, सहप्रातमंत्री, सदीपः, राहूलः, रूपेशः उदयचन्द्रादयः उपस्थिताः आसन्।

## त्रिभाषासूत्रे भवेत् संस्कृतम्-नन्दकुमारसायः

नवदेहली। राष्ट्रियशिक्षानीते त्रिभाषासूत्रे हिन्दीभाषां सम्मिलितं करणोपरि विवादस्य मध्ये राष्ट्रियजनजाति आयोगाध्यक्ष नन्दकुमारसायः हिन्दीभाषायास्थाने संस्कृतस्य विषये उक्तवान्। उक्तवान् यत् यदि संस्कृतं भवेत् तर्हि कोऽपि विरोध न करिष्यति। मानवसंसाधनविकासमंत्रालयः



पूर्वमेवोक्तं यत् हिन्दीआंग्लेनसह स्थानीयभाषा विषये राज्यसर्वकारे उक्तवान्। सायः संस्कृतं अधिकारिक भाषा निर्यातुं उक्तवान्। नूतनशिक्षानीतिः हिन्दी सम्मिलितं करणे दक्षिण भारतीयः विरोधः कृतवान्।

# प्रधानमन्त्रिमहोदयानां सादरमभिनन्दनम्

–डॉ० निरञ्जनमिश्र
हरिद्वारम्

स्वविरोधिपयोधिविमन्थनमन्दर! राष्ट्रमिदं वितनोतु शिवं
धरणीदमनोद्यतमानसदारक! जीव सुखेन शताञ्च शतम्।
श्रुतिसिद्धपदाब्जमधुद्रवसिक्तधरा तव बाहुयुगे नितरा-
मखिलेशपदाब्जरतिं वितनोत्वपसार्य च दैन्यविषादभयम्।।1।।

बहुधा विषदन्तविभञ्जनकौतुकिनस्तव मंगलमस्तु चिरं
नवजीवनकौसुमरागविरञ्जितगानमिहास्तु सदा मधुरम्।
तव कीर्तिलताकुसुमोच्चयदिव्यसुवाससुवासितमस्तु जग-
न्नवनन्दनकाननमस्तु धरा तव नीतिनियोजनदक्षधिया।।2।।

नवमार्गनिरूपणबुद्धिमिमामनुयान्तु तवापि चरास्सततं
स्वयमेव तदर्थमुपायनियोजनधर्मबली भव सत्कृपया।
विपरीतचरैर्नृपतेर्यशसो लतिका पततीह हुताशमुखे
क्व नु दग्धलता जनमानसरञ्जनपुष्पविकासवती धरणौ।।3।।

जननी सुरनिर्झरिणी जनमानसकल्मषमार्जनधर्मवती
यदि रोदिति का मनसो मुकुरस्य करिष्यति मार्जनमत्र वद।
जनतामनसोऽमलता नहि चेन्नृपतेरवलोकनमस्तु कथं
सुविचिन्त्य यतस्व झटित्यपगापदबन्धनभञ्जनमत्र कुरु।।4।।

रिपवो न हि ते समरे खरशस्त्रधरा किल ये परपक्षहरा
निजधर्मनिभालनमानधरा निवहन्ति हि ते स्वगुरोर्वचनम्।
रिपवस्तु गृहे निजसंस्कृतिहीनजना किल ये निजभोगवशात्
परसंस्कृतिसेवनधर्मधरा प्रभवन्ति हि राष्ट्रविनाशकराः।।5।।

समरेण विनैव रिपोर्मुखबन्धनकर्मणि या सफला धिषणा
कलहेन विना श्रुतिसंस्कृतिसेवनमत्र कथन्न विधास्यति सा।
स्वकलाकुशलास्तरुणा निजराष्ट्रहिताय भवन्तु सदैव रता
नहि वृत्तिविहीनतया ग्लपयन्तु कदापि विशिष्टविचारबलम्।।6।।

अपगाः परिपूर्णजलाः प्रवहन्तु लताश्च भवन्तु सदा मुदिता
निजबुद्धिविलासरतास्तरुणाः प्रभवन्तु सदा श्रुतिधर्मपराः।
निजधर्मविहीनचरा न भवन्तु न चोदरपूर्तिरतास्सचिवा
विविधार्थविलोकनकौतुकमेव नराधिपमंगलमातनुते।।7।।

गगने सलिले धरणौ समरे वरवीरभटा विलसन्तु सदा
स्वगुणोचितकर्मफलेन हि तुष्टिमवाप्य भवन्तु जनास्सुखिनः।
कपटाचरणप्रियता न भवेन्नवनीतिनटीवसनान्तरिता
बहुनायकतापदबन्धनमस्तु जना विषमा न च नीतिविधौ।।8।।

न पिबन्तु पयः फणिनो न हि वा नकुला विलपन्तु जलेन विना
मृदुला च मृगी वनराजभयाद् विपिनभ्रमणाद् विमुखी न भवेत्।
कुलगौरवमानवती तरुणी श्रियमेतु निजोच्चगुणैर्नितरां
मदनासवविक्रयणेन सुखं परिकल्पयितुं सफला न भवेत्।।9।।

वसतौ वसतौ नगरे नगरे जनमानसपंकजमोदकरं
रिपुवर्मविभेदकशूलधरं ननु दुष्टमनोभवमानहरम्।
जनमानसदैन्यविभञ्जनकौशलवृद्धिविधायकतर्कबलं
प्रणमन्ति सदा जनता समयोऽपि न तत्परिवर्तनशक्तिधरः।।10।।

रघुनन्दनवन्दनमस्तु सुखेन च गंगजलस्खलनं न भवेत्
यवनाहतकेशरवासधरा पुनरेव विमुक्तभया विहसेत्।
रणदुर्मदमर्दनशक्तिमती जनता वदतीह विशिष्टबला-
दभिनन्दनमस्तु सतां भवतां भरताग्रजराज्यविधानविधौ।।11।।

नाटिका

# गुरुसमर्चनं

–डॉ.अरविन्दतिवारी

स्थानम्- बृहस्पतिकुलं (काशी)
गुरुः-- बृहस्पतिः
दशाधिकपात्राणां प्रायो मंचनम्।
प्रथमं दृश्यम्
(नान्दी)
गुरुर्ज्योतिः गुरुः शक्तिः गुरुः गीतिः गुरुः श्रुतिः।
गुरुर्नीतिस्तथा येन रक्ष्यते भुवनत्रयम्।।
अर्च्यतां श्रद्धया नित्यं गुरुर्वन्द्यः सुमादिभिः।
यथा देवैर्हृदाभ्यर्च्यो गुरुदेवो बृहस्पतिः।।
( नान्द्यन्तेऽन्ते प्रविशति सूत्रधारः)
अहो दर्शनीयमिदं गुरुकुलम्!! अद्य मुख्यद्वारि प्रत्यग्रजातिचम्पकादिकुसुमविरचिततोरणमालिका मनोलतिकां मे हरते। अहो! अभिनवं स्वागतमिति पुष्पपरागसम्मिश्रितसुधाधवलेन विलिखितं हृदयं चोरयते। धन्या वटवो ये एवं रचयन्ति मनोहरं सर्वमपि यथावसरम्। अये! कुतो वेदध्वनिरायाति?
(किञ्चिदग्रे उपसृत्य)
विज्ञातमिदम्! अद्य श्रावणी गुरुपूर्णिमा वर्तते। अत एव सविशेषं विलोकनीयं सर्वमिदं गुरुकुले सन्दृश्यते। अस्तु सावधानेन चेतसा आत्मानं पवित्रीकरोमि मन्त्राक्षराकर्णनेन।
(वेदमन्त्रध्वनिः श्रूयते)
स्वस्ति न इन्द्रः----।
सूत्रधारः -- सौभाग्यादद्य समागतोऽत्र निलीयमानः वटुभिः क्रियमाणं गुरुपूजनं पश्यामि।
(भव्यपीठिकायां राजमानो गुरुः शिष्यैः वन्दमानो दृश्यते)
एकः - गुरुर्ब्रह्मा गुरुर्विष्णुः-----।
द्वितीयः - अज्ञानतिमिरान्धस्य---।
तृतीयः -
(गुरुवरललाटे तिलकं कुर्वन्)
चन्दनं शोभतां नित्यं ललाटे सुन्दरे गुरो।
वासितं तु भवेद् येन श्रुतं गुरुकुलं प्रियम्।।
चतुर्थः ( फलमर्पयन्)
दत्तं ज्ञानफलं योऽयं तस्मै ऋतुफलं मया।
दीयते लघुशिष्येण गृह्यतां प्रीयतां गुरो!।।
(पूजनमध्य एव स्मयमानो गुरुः सङ्केतेन पूजनसमापनं नाटयति)
गुरुः- प्रियाः अन्तेवासिनः! अलमत्रपूजनेन! कृतमर्चनम्! यूयं ज्ञानवन्तो भवत, संस्कृतं प्रचारयत, संस्कृतिं प्रसारयत। नाहमेतेन पूजनेन केवलं प्रसीदामि। मम प्रसन्नता तु तदैव भविष्यति यदा यूयं देशे देशान्तरे गत्वा द्वे विद्ये वेदितव्ये परा चौवापरा च इत्यस्य गुञ्जनं करिष्यथ।
शैलेशः- आज्ञा गुरूणां सर्वथा समीचीना, तन्मार्गमारूढा वयमनुदिनं प्रयतामहे। किन्तु गुरुपूर्णिमायामस्यां कल्पवृक्षकल्पं गुरुवरं सम्पूज्यैव ज्ञानवन्तो भवितुमिच्छामः।
गुरुः-- प्रियशैलेश! त्वं सदैव गीतैर्वाद्यैः मनोहरश्लोकगानैर्मां मोहयसि। अतः कथमहं ते वचनं न मंस्ये? किन्तु शिष्टं पूजनं एकतन्त्रेण सद्यः समाप्यताम्, येन यथासमयं संस्कृतप्रचारविषयिणी संगोष्ठी प्रवर्तताम्। अद्याहं विशेषतो विज्ञातुं विज्ञापयितुञ्चाभिलषामि।
शैलेशः - प्रसीदन्तु गुरवः! यथाभिमतं भवताम्, तदेव करिष्यामहे।
(शीघ्रं शेषं पूजनं सम्पादयितुं लग्नो भवति)
गुरुवर्या वयं शिष्याः सावधानाः दिवानिशम्।
संस्कृतस्य विकासार्थं संलग्ना वटवो ध्रुवम्।।
गुरुपर्वणि सम्प्रीतं राजमानं मनस्विनम्।
सम्पूज्यैकतन्त्रेण प्रसीदामो मुहुर्मुहुः।।
(धवलदुकूलेन गुरुवरम् समलंकुर्वन्ति)
गुरुः- चित्रसेन! कथं पृष्ठे उपविष्टवान् वर्तसे?
चित्रसेनः- गुरुवर्याः! सादरं प्रणमामि! मम पार्श्वे स्वल्पमेव धनमासीत् अतः एकं लड्डुकमानीतवान् अस्मि।
गुरुः- मा चिन्तय, त्वयैव सुन्दरं कृतम्। व्यर्थमेते अरविन्दादय आडम्बरम् उपकल्पयन्ति, न मे रोचते बहु पूजनम्। आगच्छ इदं कदलीफलं गृहाण। सर्वेभ्यः इमानि फलानि मिष्टानानि च वितर।
चित्रसेनः- ओम्! वितरामि शीघ्रम्।
गुरुः- अन्तेवासिनः! यूयं भुक्त्वा हस्तं मुखं च प्रक्षाल्य समुपविशत।
( ततः सर्वे हस्तमुखादिप्रक्षालनाय प्रयान्ति)
द्वितीयं दृश्यम्
( सज्जो मञ्चः, समुपासीना अन्तेवासिनः शिष्याश्च। ततः प्रविशति सन्तोषः हस्ते मिष्टानं वस्त्रं माल्यं चादाय।)
मणिः-- सखे! कथमद्यापि विलम्बेनागच्छसि?
सन्तोषः- मार्गे जनसम्मर्द आसीत्, अतः विलम्बो जातः।
मणिः- मम माल्यं तव माल्यात्सुन्दरमस्ति, पश्य गुरुवरग्रीवामलंकरोति।
सन्तोषश- सखे जानामि सर्वमहम्। भवदानीतं माल्यं विश्वनाथमन्दिरस्य वर्तते, अहन्तु कुसुमविपणित द्रव्येण क्रीत्वा आनयामि।
(सर्वे तारस्वरेण हसन्ति)
गुरुः- (विहसन्) प्रियवर मणे! त्वया सुन्दरमेव कृतम्। अनेन स्वल्पव्ययेन सर्वमपि सिद्धम्।
मणिः- गुरुवर्याः! एते मम भ्रातरो मनोविनोदप्रवीणा यद्वदन्ति तदेव साधु।
गुरुः- सन्तोष! कृतपूजना एते सर्वेऽपि, अतस्त्वं पूजनोपकरणं स्थापय। मन्यस्व गृहीतं मया तव सर्वमपि।
सन्तोषः- गुरुवराः! दूरान्माल्यमानीतवानस्मि, एतद् भवतां ग्रीवामलंकर्तुम् इच्छति।
गुरुः-- (मनसि विचिन्त्य) अर्पय, भवतु तवाभिलषितम्।
गुरुः - किन्तु श्रृणु! नाहं तव कार्येण प्रसन्नो वर्ते। त्वं ममानुरूपं न गच्छसि, न मनो मे तव किमपि लब्धुमिच्छति।
सन्तोषः- पूज्यवराः! प्रसीदन्तु! अहं संकल्पं गृहीतवानस्मि, यत् शीघ्रमेव धातुरूपनिदर्शनं कण्ठे कृत्वा श्रावयिष्यामि। रोषं त्यजन्तु।
गुरुः- विगतसंवत्सरेऽपि त्वया एतदेव प्रोक्तमासीत्, महता श्रमेण वाक्यसंग्रहं धातुरूपाणि शब्दरूपाणि च कण्ठे कृतवान्। त्वन्तु मासस्य द्विरधीषे, येन केन ब्याजेन गृहमेव पलायसे।
(तर्ज्यमानः सन्तोषो वेपमानो माल्यमर्पयित्वा तूष्णीमास्ते)
( विषयान्तरं कुर्वन् सुधेन्दुः)
गुरुवर्य! कृपाशंकरादयो न दृश्यन्ते, क्व गतास्ते?
गुरुः-- ते प्रातरेव सर्वप्रथमं पूजनं कृत्वा पुस्तकालये कार्यं कुर्वन्तस्सन्ति। आकारय तानपि।
(गुरोराज्ञया सुधेन्दुराकारयति तान्)
(अनिलो मध्ये उत्थाय)
गुरुदेव! सादरं वन्दे!
गुरुः- आयुष्मान् भव! कथय, किमपि वक्तुं लक्ष्यसे?
अनिलः- अहमद्यतनसंगोष्ठीसंचालनं कर्तुं वाञ्छामि।
गुरुः-- (सविस्मस्यम्) शृणुत! शृणुत! अध्ययनकाले तु इतस्ततो भ्रमन् दिनमतिवाहयति, निगृहीतः कदाचिद् उदरविकारं कथयति, कदाचित् शिरोवेदनां नाटयति, इदानीं संचालनं कर्तुमीहते। सुन्दम्, अतिसुन्दरम्!
प्रायो न दृश्यत इवैष च वोपदेवः
कक्षान्तरेषु नितरां प्रविलीयमानः।
कर्तुं प्रवक्ति मुदितस्तु विचारगोष्ठी-
संचालनं वदत किं करवाणि शिष्याः?
अनिलः-- गुरुवर! सशपथं वच्मि, त्यक्तं मया दुर्गुणजालमधुना। गतमासादेव कक्षायां समयेन गच्छामि। दो मासमें संस्कृत इति कण्ठीकरोमि। बालकवितावली, संस्कृतगानमाला संस्कृतगौरवगानं च कण्ठस्थीकृतानि मया। श्रोतुमर्हन्ति गुरवः! सर्वमपि मम कण्ठे विराजते।
किं श्रावयानि गुरुवर्य च धातुरूपं
वा शब्दरूपमखिलं गुरुपूर्णिमायाम्।
वा पद्यसंग्रहमहं ललिताख्यं पुस्तं
वा शब्दकोषमखिलं निगदानि सद्यः?
गुरुः- प्रसीदामि त्वयि! बहु सुन्दरं! बहु शोभनम्! अनेनैव प्रकारेण सदाध्ययनं कुरु। किन्तु अद्य संचालनं सुधेन्दुः कुर्यात्।
(सुधेन्दुं संचालनाय संकेतयति)
सुधेन्दुः- सुहृदः! अद्यतनं दिनं परमसौभाग्यप्रदं वर्तते। यदत्र वयम् एकत्रिताः गुरुवर्याणां पूजनाय समुपस्थिताः। प्रतिवत्सरमिव शुभपुण्यगुरुपर्वणि
पूजनं विधाय संस्कृतप्रचारप्रसारविषयिणीं संगोष्ठीमायोजयामः। अहं समयमवेक्ष्य सारं वक्तुं सुधांशुमाह्वयामि। मित्रवरः स्वविचारं प्रकटीकरोतु।
सुधांशुः- (गुरुमभिवाद्य सर्वान् प्रणमन्)
गुरुवराः! सम्प्रति गुरुकुलेषु बहवो विद्यार्थिनो नो संस्कृतं प्रभाषन्ते। अहं नव्यव्याकरणं पठितुं पराशराश्रमं गच्छामि, तत्र तु न कोऽपि संस्कृतसम्भाषणं कुरुते। यदाहं वदामि तदा नासिकामाकुञ्चयन्ति। अतस्तत्र संस्कृतसम्भाषणशिविरायोजनं क्रियेत।
गुरुः- उत्तमस्ते विचारः। महेन्द्रस्तत्र शिविरं संचालयितुं गच्छेत। अयं युष्मासु प्रतिभावान् वर्तते।
सुधेन्दुः- अतः परं मित्रवरः अमरो वदतु स्वविचारम्।
अमरः- प्रणौमि गुरुवर्यम्! पत्रमञ्जूषा मया सम्यगधीता, पत्रलेखने ममाधिकारो जातः, निबन्धरचने दक्षोऽस्मि, किन्तु श्लोकगाने कदा सिद्धिर्भविष्यति? कदाहं च शिविरसंचालनाय सज्जो भविष्यामि?
गुरुः- प्रियवर! अमर! शुभं ते भूयात्! पर्वतमिव गुरुभारं हस्ते कुर्वन् तृणभारेण दुनोषि किम्?
मा चिन्तय, संगीताध्यापको राधाकान्तमहोदयः त्वं श्लोकगानं सद्य एव शिक्षयिष्यति।
सुधेन्दुः-- इदानीं विश्रुतः श्रावयतु सुविचारं स्वल्पेन वचसा।
विश्रुतः- ( प्रणमन्)
यद् यद् गुरोर्विरचितं किल पुस्तकं तत्
सम्यक् मयैव परिशीलितमत्र नूनम्।
अस्मात् प्रयातुमभिकामय एव दूरं
सम्भाषणस्य शिविराणि विधातुमुत्कः।।
(सर्वे तालिकावादनं कुर्वन्ति)
गुरुः- आयुष्मन्! विश्रुत! त्वं विश्रुतो भव! पृच्छ सुधेन्दुम्! स वक्ष्यति क्व ते गन्तव्यमस्ति?
सुधेन्दुः-- ज्ञानकल्पद्रुम! बाबाधामतः बहुवारं संस्कृतशिविरसंचालनाय अनुरोधपत्रं प्राप्तमस्ति। अतस्तत्रैव विश्रुतः प्रेषणीयः।
गुरुः- सत्यमुक्तम्, तदेव क्रियताम्।
सुधेन्दुः- श्रीमन्तं महेन्द्रमहम् अनुरुन्धे, यदसौ सकलप्रचारयोजनां निवेदयेत्।
महेन्द्रः- वन्दनीया गुरवः! अस्मिन् वर्षे महता उत्साहेन दश संस्कृतसम्भाषणशिविरचालकाः प्रशिक्षिताः, ये मासद्वये संस्कृतं शिक्षयितुं पूर्णरूपेण दक्षाः सज्जाश्च सन्ति।
गुरुः- के च ते?
महेन्द्रः- दिनेशः, प्रभाकरः, वागीशः, विपुलः, जीवनः, उमाकान्तः, शशिकान्तः, कृष्णकुमारः, दीपकः, मनोजश्चेति।
गुरुः- अतीव प्रियं वृत्तमेतत्। एतान् सर्वानपि संस्कृतसम्भाषणशिक्षकान् सुदूरं प्रेषयितुमिच्छामि, यत्र संस्कृतह्रासो दृश्यत इव। अस्तु
सुधेन्दो! अधुना अनिलः शेषसंगोष्ठीसंचालनं कुरु।
सुधेन्दुः- यथा गुरुजनाज्ञा।
अनिलः- गुरुवर! सादरं वन्दे।
गुरुः- विद्वान् भव!
अनिलः- अनुगृहीतोऽस्मि।
(प्रणम्य आरभते)
अनिलः- धीरजः अस्यां संगोष्ठ्यां स्वविचारान् श्रावयतु।
धीरजः- गुरुवर्य! ग्रीष्मावकाशे अहं गृहं गतवानासम्, तत्र च मातुलपुत्रीविवाहोत्सवे अपि गतवान्, तत्रैव मम परिचयं पृच्छता एकेन कथितं यत् संस्कृतपठनेन लाभो न कश्चिदपि वर्तते। अतः अहं जिज्ञासे यत् धनार्थमेव विद्या गृह्यते, उक्तं चापि वर्तते अर्थकरी विद्या ग्राह्याष् तत्
विना धनं वृथा मतं जनस्य हन्त जीवनम्
धनं विना मतं वृथात्र वेदमन्त्रगर्जनम्।
अतो मनोऽद्य कम्पते वृथा भवेन्न संस्कृतं
गुरो प्रशास्तु मन्मनो निवेदयामि सत्वरम्।।
गुरुः- आयुष्मन् धीरज! यदि वाञ्छसि मूर्खत्वं ग्रामे वस दिनत्रयम् इति सूक्तिं न श्रुतवानसि?
किं संस्कृतं पठित्वा अनेके महोच्चपदेषु न सन्ति? ये प्रचुरं धनं मानं चार्जयन्ति।
संस्कृतः सर्वत्र गन्तुं शक्नोति। स शिक्षको भूत्वा संस्कृतसेवां कर्तुं शक्नोति, प्रशासनिकपरीक्षामुत्तीर्य प्रशासको भवितुमर्हति। आयुर्वेदविद्यामधीत्य महान् वैद्यो भूत्वा जनसेवां कुर्वन् यशो धनं च लब्धुमर्हति।
धीरजः- गुरुदेव! मम पितृपादाः संस्कृतपाठशालायां पाठयन्ति, वदन्ति च तत्र वेतनं स्वल्पं वर्तते।
गुरुः- पुत्र! 'न वित्ते तर्पणीयो मनुष्यः' इत्युपनिषद्वचनं न जानासि? यथोपलब्धधनेनापि जीवनयात्रा चालयितव्या। अस्मिन् विषये च आन्दोलनेन सर्वकारोऽपि बोधनीयः। अतस्त्वं वित्तचिन्तामपहाय मनो लगय पठन- पाठने। सहैव संगणकज्ञानमपि प्राप्नुहि, यदि संस्कृतसम्भाषणेन साकं सम्यक् संगणकज्ञानमपि वर्तते चेत् स्वर्णे सुगन्धवत् भवति।
धीरजः- आं गुरुवर! भवतो वचनं शिरोधार्यम्।
अनिलः - अतः परं मुकेशो निजभावं निदगदतु।
मुकेशः-( साञ्जलिः) गुरुवर्याः! सादरं प्रणौमि! संस्कृतं पठित्वाहं सैनिको भवितुमिच्छामि। भवद्विरचितं सैन्यगीतं मां सर्वदैव प्रेरयति
सादरं समीयतां वन्दना विधीयताम्
श्रद्धया स्वमातृभूसमर्चना विधीयताम्।
आपदो भवन्तु विद्युतो लसन्तु
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा।
धीरता न हीयतां वीरता विधीयतां
निर्भयेन चेतसा पदं पुरो निधीयताम्
सादरं समीयतां वन्दना विधीयताम् '
प्राणदायिनी इयं त्राणदायिनी इयं

शेषभागः सप्तमपुटे

# सम्पादकीयम्

अयि अमरभारतीप्रणयिनः!

अस्माकं देशे नवसर्वकारः जनैश्चितो वर्तते। नवसर्वकारे सर्वमपि कार्यं नवतामुपैतु इति भवन्तो भवत्यश्च सादरं प्रयतन्ताम्। यदस्मिन् सर्वकारे संस्कृतनवसूर्य उदयं प्राप्नुयादिति। नेतारः संस्कृते शपथग्रहणं कुर्वन्तु इति जनरवः सर्वत्र श्रूयते। बहुभिस्तु सादरमनुरोधः कृतो माननीयः प्रधानमन्त्री संस्कृते शपथग्रहणं कुर्यादिति। अस्तु संस्कृतेन साकं सर्वस्यापि विकासो भवेत्। भाषाणां विकासेनैव तत्र प्रदत्तविचाराः मानवहृदयं स्पृशन्ति। येन महान् भवति लाभः। अहं तु पश्यामि यत् समुचितेऽपि काले संस्कृतज्ञा एकस्वरं नैवोत्थापयन्ति। सर्वे स्वस्वरागमालापयन्ति, येन सिद्धमपि कार्यमसिद्धं कदाचिद् भवत्येव। मम करबद्धं निवेदनमस्ति, यत् संगच्छध्वं संवदध्वं सं वो मनांसि जानतामिति केवलं मुखेनैव नोच्चारयन्तु अपि कर्मणापि दर्शयन्तु। सुरभारती सम्प्रति प्रतीक्षते सर्वानपि। अतो विहाय लज्जां हित्वा भयं बद्ध्वा कटिमायान्तु, येन संस्कृतध्वजः प्रसरेत् सर्वत्र।

इममेव भावं प्रकटीकुर्वती अहं सर्वमंगलं कामये।

भवदीया

सम्पादिका

## वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

आदृध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम्।

होत्रा देवेषु गच्छति ॥8॥

अर्थ-जिस कारण परमेश्वर सकल संसार को रचता है, इस से सब पदार्थ परस्पर अपने-अपने संयोग से बढ़ते और ये पदार्थ क्रियामय यज्ञ और शिल्पविद्या में अच्छी प्रकार संयुक्त किये हुए बड़े-बड़े सुखों को उत्पन्न करते हैं ॥ 8 ॥

फिर वह यज्ञ कैसा है, इस विषय का उपदेश अगले मन्त्र में है-

नराशंस सुधृष्टमुमपश्यं सुप्रथस्तमम्।

दिवो न समखसम्॥9॥

अर्थ-इस मन्त्र में उपमालङ्कार है। जैसे मनुष्य सब जगह विस्तृत हुए सूर्यादि के प्रकाश को देखता है, वैसे ही सब जगह व्याप्त ज्ञान-प्रकाशरूप परमेश्वर को जानकर सुख के विस्तार को प्राप्त होता है। इस मन्त्र से 'सदसम्पतिम्' इस पद की अनुवृत्ति जाननी चाहिए।9॥

पूर्व सत्रहवें सूक्त के अर्थ के साथ मित्र वरुण के साथ अनुयोगी बृहस्पति आदि अर्थों के प्रतिपादन से इस अठारहवें सूक्त के अर्थ की सङ्गति चाहिए।

यह अठारहवाँ सूक्त और पैंतीसवाँ वर्ग पूरा हुआ।

(19) अथ नवर्चस्यैकोनविंशस्य सूक्तस्य काण्वो मेधातिथिः ऋषिः। अग्निर्मरुतश्चदेवता। 1,3-8 गायत्री; 2 निचृद्गायत्री; 1 पिपीलिकामध्यानिचृद्गायत्री च छन्दः। षड्जः स्वरः॥

अब उन्नीसवें सूक्त का आरम्भ है। उसके पहले मन्त्र में अग्नि के गुणों का उपदेश किया है-

**प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे।**

**मरुद्भिरग्न आ गहि॥1॥**

अर्थ-जो यह भौतिक अग्नि और प्रसिद्ध सूर्य विद्युतरूप से पवनों के साथ प्रदीप्त होता है, वह विद्वानों को प्रशंसनीय बुद्धि से हरएक क्रिया-सिद्धि वा सबकी रक्षा के लिए, गुणों के विज्ञानपूर्वक उपदेश करना वा सुनना चाहिए।।1।।

अगले मन्त्र में अग्नि शब्द से ईश्वर और भौतिक अग्नि के गुणों का उपदेश किया है-

**नहि देवो न मर्त्यो महस्तव क्रतु परः।**

**मरुद्भिरग्न आ गहि॥2॥**

अर्थ-परमेश्वर को सर्वोत्तमता से उसकी महिमा वा कर्म अपार हैं, इससे उनका पार कोई नहीं पा सकता, किन्तु जितनी जिसकी बुद्धि वा विद्या है, उसके अनुसार समाधियोगयुक्त प्राणायाम से जोकि अन्तर्यामिरूप करके वेद और संसार में परमेश्वर ने अपनी रचनास्वरूप वा गुण व जितने अग्नि आदि पदार्थ प्रकाशित किय हैं उतने ही जान सकता है। अधिक नहीं।।2।।

अगले मन्त्र में अग्नि शब्द से ईश्वर और भौतिक अग्नि के गुणों का उपदेश किया है-

# भगवती गङ्गा

–बलदेवानन्द-सागरः
baldevanand-sagar@gmail-com

–''दिव्यमुक्तेः पवित्रतायाः च अनन्तः प्रवाहः''

भगवतः विष्णोः ज्ञानरूपा भावरूपा क्रियारूपा च तिस्रः शक्तयः वर्तन्ते, ताश्च भगवती लक्ष्मीः, भगवती सरस्वती, भगवती गङ्गा चेति विद्वद्भिः निगद्यते।

एकदा भगवान् विष्णुः भगवतीं गङ्गाम् अकथयत्- "त्वं पृथिव्यां पवित्र-नदीत्वेन भवितासि या हि वसुधा-वासिनाम् अखिलानां प्राणिनां पापानि अपाकरिष्यति। सूर्य-वंशावतंसः भगीरथः नाम राजा त्वां पृथ्वीं सन्नेष्यति। अनन्तरं त्वं भगवतः शिवस्य पत्नीरूपेण कैलास-पर्वतं प्रतिष्ठिता भवितासि।"

सूर्यवन्शे सगरः नाम नृपतिः अभवत्, स च अश्वमेध -यागस्य अनुष्ठानम् अकरोत्। यज्ञ-सम्पूर्ति-हेतोः सगरस्य षष्टि-सहस्रं पुत्राः यागस्य अश्वेन सह पूर्णस्य विश्वस्य पर्यटनं कृतवन्तः। परञ्च यथैव ते सागर-तटस्य समीपम् आगताः, यज्ञ-अश्वः सहसा विलुप्तः जातः।

कुत्र गतोऽयम् अश्वः? नृपतेः सगरस्य पुत्राः विलुप्तम् अश्वं सर्वत्र अन्विष्टवन्तः। अश्वस्य अन्वेषणार्थं यदा पृथिव्यां न किमपि स्थानम् अवशिष्टम्, तदा ते अन्ततः पाताल-लोकं प्रयाताः द्य तत्र ते अश्वं दृष्टवन्तः। अयम् अश्वः गूढ-ध्यानस्थं महर्षिं कपिलं निकषा बद्धः आसीत्। वस्तुतस्तु, देवेन्द्रः अमुम् अश्वं चोरितवान्। सगर-पुत्राः तथ्यमिदम् अजानन्तः महर्षिं कपिलम् आक्रान्तुं सन्नद्धाः जाताः । क्रोधेन आविष्टः महर्षिः स्वीय-नेत्रे उन्मील्य दृष्टि-मात्रेण तान् भस्मीसात् चकार।

नृपतिः सगरः विलुप्तान् राजकुमारान् अन्वेष्टुं स्वीयं पौत्रम् 'अन्शुमन्तं' प्रेषितवान्। अन्शुमान् यदा महर्षिं दृष्टवान् , सादरम् असौ तं नमस्कृतवान्। अन्शुमतः विनम्रताम् अवलोक्य प्रसन्नः तपोमूर्तिः कपिलः अश्वं परावर्तितवान् , अवादीत् च, यत् "सगर-पुत्राणां मुक्तये त्वया भगवती गङ्गा धरातलम् आनेतव्या। " परञ्च अन्शुमान्, तस्य पुत्रः दिलीपः वा एतत् कार्यं कर्तुं नैव अपारयताम्। तत्रान्तरे, दिलीपस्य आत्मजः भगीरथः राजा अभवत्।

भगीरथः भगवतीं गङ्गां धरातलम् अवतारयितुं समैहत। सः स्वीय-राज्य-कार्य-भारं निज-मन्त्रिभ्यः दत्वा तपश्चर्याम् आचरितुं हिमालयं प्रति अगच्छत्। भगीरथस्य अनेक-वर्षीयाया कठोर-तपश्चर्यायाः अनन्तरम्, भगवती गङ्गा तस्य समक्षं प्रत्यक्षीभूता। भगीरथस्य श्रद्धया समर्पणेन च तुष्टा भगवती गङ्गा अवोचत्– "भो भगीरथ ! अहं धरातलम् आगन्तुं सन्नद्धा अस्मि। परन्तु भगवान् शिवः एव मम अवतरण-वेगं धारयितुं शक्ष्यति।"

कृतनिश्चयः भगीरथः भगवन्तं शिवं प्रसादयितुं पुनः तपः आचरितवान्। अनेकेषां वर्षाणाम् अन्तरालानन्तरं भगवान् शिवः प्रत्यक्षीभूतः। भगीरथस्य कामनां प्रपूरयन् भगवान् शिवः अवादीत् -"स्वर्गतः अवतरन्त्याः गङ्गायाः प्रवाह-वेगं धारयितुं शक्ष्यामि।"

एवं प्रकारेण, भगवान् शिवः निज-जटा-कलापे स्थातुं भगवतीं गङ्गां सत्कृतवान्। तदनु, भगवती गङ्गा कौतुकेन विचारितवती- "मन्ये, भगवान् शिवः सुदीर्घ-कालं यावत् मम प्रवाह-वेगं धारयितुं नैव शक्ष्यति। कथं नाहं भगवन्तं शिवम् आत्मना साकमेव पाताल-लोकं नयेयम्?" परन्तु सर्वज्ञः भगवान् शिवः भगवतीं गङ्गां स्वीय-जटा-कलापे आबद्धवान्। अनेक-वर्षाणि यावत् भगवती गङ्गा ततः निष्क्रान्तुं निरर्थकं प्रायतत। भगीरथः पुनः भगवन्तं शिवं प्रसादयितुं तपस्याम् अकरोत्। भगवान् शिवः स्वीयं जटा-कलापं उन्मोचितवान्, ततः गङ्गा-प्रवाहः पृथ्वीम् अस्पृशत्।

पृथिव्यां अवतरितस्य गङ्गा-जलस्य सप्त-धाराः अभूवन्। तासु धारा-त्रयं प्राचीं प्रति, अपरं धारा-त्रयं प्रतीचीं प्रति प्रावहत्। सप्तमः प्रवाहः भगीरथम् अन्वगच्छत् , अपि च, अन्तिमत्वेन महात्मनः जह्नोः आश्रमं प्राप्तवान् द्य अहङ्कार-पूर्णा भगवती गङ्गा सोत्साहं स्वीय-शक्ति-प्रदर्शनार्थं आश्रमं जलाप्लावितम् अकरोत्। अनेन विक्षोभेण क्रुद्धः महात्मा जह्नुः गङ्गायाः अपानि पीतवान् , गङ्गां च शोषितवान्। भगीरथः महर्षेः पादारविन्दयोः निपत्य याचितवान् यत् - "कृपया गङ्गा-देवीं क्षम्यताम्, हे महात्मन् ! भवान् यदि एनां विमोक्ष्यसि चेत्, मम पूर्वजाः मुक्ताः भवितारः।"

महात्मा जह्नुः भगीरथे करुणान्वितः सन् गङ्गा-प्रवाहं निज-कर्ण-कुहरात् बहिः निष्कासितवान्। ततः प्रभृति देवी गङ्गा जाह्नवी- इति नाम्ना अपि प्रख्याता जाता। जाह्नवी अर्थात् जह्नु-मुनेः जाता सरित् वा कन्या।

ततः परम्, भगीरथः गङ्गां पाताल-लोकम् अनयत्। यथैव देवी गङ्गा सगर-पुत्राणां भस्मावशेष-स्थलीम् आप्लावितवती, ते सर्वे अपि मुक्ताः सञ्जाताः। एवं रीत्या, भगीरथः यत् कार्य-लक्ष्यं निश्चितवान् , तत् पूर्णताम् अनयत्। ततः परम्, भगीरथः देवीं गङ्गां सागरं प्रति नीतवान्।

अनेक-वर्षाणि व्यतीतानि। एकदा नृपतिः शन्तनुः गङ्गा-नद्याः तीरे सुन्दरीं रमणीमेकाम् अपश्यत्। वस्तुतः एषा मानव-रूपधारिणी भगवती गङ्गा आसीत्।

"भो परम-सौन्दर्य-शालिनि महाभागे, ममेदं सौभाग्यम् अभविष्यत्, यदि भवती मम अर्धाङ्गिनी अभविष्यत्", - शन्तनुः स्वीयां समीहां प्राकटयत्। भगवती गङ्गा प्रसन्ना सती उदतरत्-"ससमयं भवता सह विवाहं करिष्यामि। कदाचिदपि भवान् मम कार्य-विषयिणीं पृच्छां नैव करिष्यति - इति-"

राजा शन्तनुः समयमेनं स्वीकृतवान् , अपि च, अनयोः विवाहः महता समारम्भेण वैभवेन च सम्पन्नः। किञ्चित्-कालानन्तरम्, ताभ्याम् एकः पुत्रः अजायत। भगवती गङ्गा च किम् अकरोत्...? सा तं पुत्रं नद्याम् अक्षिपत्। राजा शन्तनुः स्तब्धः एवातिष्ठत् यतो हि तेन स्वीय-पत्न्या सह कृतः समयः परिपालनीयः आसीत्। पत्न्याः आश्चर्यकारिणः कार्यस्य विषये स न किमपि प्रष्टुम् अपारयत्।

एतावत्-पर्यन्तमेव पर्याप्तं नासीत्। सा अपरान् अपि सद्योजातान् षट् पुत्रान् नद्याम् अक्षिपत्। राजा शन्तनुः स्वीय-दुःखं नियन्त्रितवान् परं निज-पत्नीं न किमपि प्रष्टुम् अपारयत्। परञ्च, भगवती गङ्गा यथैव स्वीयम् अष्टमं पुत्रं नद्याम् प्रक्षेप्तुम् उद्यता, राजा शन्तनुः ताम् अवरोधितवान्, प्रार्थितवान् च - "कृपया आत्मजम् एनं जीवितुम् आज्ञापय।" तस्मिन् क्षणे एव भगवती गङ्गा स्वीय-पुत्रेण साकं तिरोहिता बभूव।

अनेक-वर्षाणि व्यतीतानि। राजा शन्तनुः यदा मृगयार्थं गतः आसीत्, सः अनुपममेकं दृश्यम् अपश्यत्। कश्चन परस्सहस्रं शरौघैः भित्तिं निर्मीय गङ्गा-प्रवाहम् अवरोधितवान्। शन्तनुः किञ्चित् अग्रे गत्वा अपश्यत् यत् तत्र एकः बालकः स्थितौऽस्ति। अयमेव बालकः परस्सहस्रं शरौघैः भित्तिं निर्मीय गङ्गा-प्रवाहम् एवम् अवरोधितवान्। शन्तनुः सन्निकटं गत्वा तं द्रष्टुम् ऐच्छत् परञ्च सः तिरोहितः। तस्मिन्नेव क्षणे शन्तनुः अन्वभवत् यद् - "कदाचित् एषः मम पुत्रः सम्भवेत् ?

"शन्तनुः सौत्सुक्यं देवीं गङ्गां प्रार्थितवान्। भगवती गङ्गा निज-पुत्रेण साकं स्वयमेव उपस्थिता अजायत न्यगादीच्च यत् "अयमेव अस्मदीयः अष्टमः पुत्रः देवव्रतः अस्ति।" भगवती गङ्गा एतदपि न्यगादीत् यत् "अष्टसु वसुषु अन्यतमः अयं द्यौः अस्ति यः अस्माकं पुत्र-रूपेण पुनर्जातौऽस्ति। कृपया एनं स्वीकरोतु।" भगवती गङ्गा शन्तनवे देवव्रतं दत्वा कैलासम् आरूढवती, महाविष्णोः वचनञ्च सत्यापितवती।

एषा अस्ति कथा यत् भारतस्य पवित्रा नदी गङ्गा केन प्रकारेण धरातलम् अवतीर्णा। गङ्गायाः पवित्रता-विषये महाभारत-ग्रन्थे लिखितमस्ति यत् "दुष्कर्म-निवृत्यर्थं गङ्गा-जलावगाहनं परमावश्यकम्। गङ्गा-जलावगाहनं शत-यागानाम् अनुष्ठान-तुल्यं वर्तते। भारतवासिनां कृते गङ्गा केवलं नदी एव नैवास्ति परमेषास्ति- "दिव्य-मुक्तेः पवित्रतायाः च अनन्त-प्रवाहः।"

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कं रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**

**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**

**IFC Code- IOBA0002249**

# संस्कृतसाहित्यस्योपन्यासपरम्परा

–डॉ. मुकेशकुमारः
सहायकाचार्यः
राजकीयस्नातकोत्तरमहाविद्यालयः
हिसारम्

संस्कृतवाङ्मये गद्यकाव्यानां प्राचीनकालादेव अनवरतं प्रणयनं विधीयमानमस्ति। महर्षिपतञ्जलिना महाभाष्ये तिस्र आख्यायिका उल्लिखिता एव। जल्हणप्रणीतायां सूक्तिमुक्तावल्यां शूद्रकथायाः लेखकयोः रामिलसौमिलयोः नामापि उल्लिखितम् अस्ति। बाणेन हर्षचरिते गुणाढ्यप्रणीताया बृहत्कथाया भट्टारहरिश्चन्द्रस्य गद्यबन्धस्य उद्देशो विहितः। सुबन्धुप्रणीता वासवदत्ता बाणभट्टविरचिता कादम्बरी दण्डिप्रणीतं दशकुमारचरितम् चेति गद्यकथाग्रन्था उपन्यासपरम्पराप्रवाहमन्वबध्नन्।

आधुनिकोपन्यासशैल्यां पण्डिताम्बिकादत्तव्यासप्रणीतः शिवराजविजयः संस्कृतभाषाया आद्य उपन्यासो गण्यते। तस्य रचना बाणादिकवीनां मार्गमनुसृत्यैव विहिता। अम्बिकादत्तव्यासात् प्रागपि उपन्यासप्रणयनं प्रारब्धम् आसीत्, अथ सा उपन्यासपरम्परा निर्बाधमनवरतं संस्कृतसाहित्यं समेधयते। तेषां विदुषां तत्प्रणीतानामुपन्यासानाञ्च सिंहावलोकनमत्र प्रस्तूयते।

उपन्यासकाराणां संक्षिप्तपरिचयः

संस्कृतसाहित्ये गद्यकाव्यप्रणयनशृंखला प्राचीनकालादेव अनवरतं प्रवहन्ती लभ्यते। अस्य भूयिष्ठं साहित्यं करालकालकवलतां प्राप्तः इति पृथग्विषयः। उपलब्धेषु गद्यकाव्येषु त्रीणि गद्यकाव्यरत्नानि अधुनापि नीरवतमोबहुलं गद्यगगनं दीपयन्ति। तानि सन्ति - सुबन्धुप्रणीता वासवदत्ता, बाणविरचिता कादम्बरी दण्डिरचितं दशकुमारचरितञ्चेति। एतेभ्योऽनन्तरमपि कानिचन गद्यकाव्यानि विरचितानि, परं लोके विश्रुतिं न गतानि; यथा-तिलकमञ्जरी उदयनसुन्दरीकथा, गद्यचिन्तामणिः वेमभूपालचरितम् इत्यादीनि। आधुनिकयुगे नैकैः गद्यकारैः गद्यप्रणयनेन संस्कृतसाहित्यं संवर्द्धितं पोषितञ्च। तेषां समासेनेह परिचयः प्रस्तूयते–

1. विश्वेश्वरपाण्डेयः (1708 - 1877)

उत्तरप्रदेशवास्तव्यो भारद्वाजगोत्रोत्पन्नो बाल्यादेव कुशाग्रमतिः श्रीविश्वेश्वरपाण्डेयः व्याकरणदर्शनसाहित्यविषयेषु विंशतीः ग्रन्थान् अकार्षीत्। एतेष्वन्यतमो 'मन्दारमञ्जरी' इत्याख्यः बाणशैलीमनुसृत्य पुष्पपुरनृपतिराजशेखरसुतस्य चित्रभानोः विद्याधरचन्द्रकेतुचन्द्रलेखासुतायाः मन्दारमञ्जर्याः काल्पनिकप्रणयपरिणयाकर्षणमवलम्ब्य विरचितः उपन्यासो वर्तते।

2. शङ्करलालमाहेश्वरः (1844 - 1916 ई.)

गुर्जरदेशसमुत्पन्नो भारद्वाजगोत्री जामनगरमहाराजाल्लब्धशीघ्रकविविरुदो आंग्लशासनात्प्राप्तमहामहोपाध्यायालङ्कारः श्रीशङ्करलालमाहेश्वरः पौराणिकं सांस्कृतिकं च विषयमवलम्ब्य माहेश्वरप्राणप्रिया, भगवतिभाग्योदयः चन्द्रप्रभाचरितम् अनसूयाभ्युदयञ्चेति चतुर उपन्यासान् कृतवान्।

3. गणपतिमुनिः (1850 - 1936 ई.)

तमिलनाडुप्रदेशोद्भवो वलगैमानमग्रहारजनपदवास्तव्यः काँजीवरम्बेलूरक्षेत्रपाठशालासु विहिताध्यापनः श्रीगणपतिमुनिः 'पूर्णा (1930 ई.)' इत्युपन्यासं प्रणिनाय यश्चापूर्ण एव विद्यते।

4. गोपालशास्त्री (1853 -1924 ई.)

तमिलनाडुप्रदेशान्तर्गतविजगापट्टमं निकषा नांगुराग्रहारे लब्धजन्मा गोपालशास्त्री नारीजीवनस्यायामवैविध्येन प्रेरितः 'अतिरूपचरितम्' (1908 ई.) इति उपन्यासं लिलेख यश्च 'संस्कृतसाहित्यपरिषद्' इति पत्रेण 1908 ईसवीये प्रकाशितः।

5. परमेश्वरझा (1856 - 1924 ई.)

बिहारप्रदेशान्तर्गते तरूवनीग्रामे लब्धजनिः राजपण्डितः भारतधर्ममण्डलादवाप्तवैयाकरणकेसरीविरुदो ब्रिटिशगवर्नरेण 'महामहोपाध्यायालङ्कारभूषितो' बिहारपण्डितसभया 'विद्यानिधिः' इति पदेनालंकृतः परमेश्वरझा नारीजीवनमाश्रित्य 'कुसुमकलिका' (1924) भावपूर्णमुपन्यासं रचयामास।

6. लक्ष्मणसूरिः (1859 - 1919 ई.)

तमिलनाडुप्रदेशे रामनाथपुरञ्जनपदान्तर्गते श्रीवेल्लिपुत्तूरं निकषा लक्ष्मणसूरिः मथुसुभाय्यरपुत्रत्वेन जन्मावाप। आंग्लशासनेन 'महामहोपाध्याय' इति विरुदविभूषितः ऐतिह्यं वृत्तमवलम्ब्योपन्यासत्रयमकार्षीत्। ते च भीष्मपितामहस्य जीवनवृत्तमाश्रित्य 'भीष्मविजयम्' महाभारतकथामाश्रित्य 'महाभारतसंग्रहः' (1904) रामायणवस्तु आश्रित्य च 'रामायणसंग्रह' इति सन्ति।

7. अम्बिकादत्तव्यासः (1869 - 1900)

बिहारभूषण-भारतभूषण-भारतरत्न-भारतभास्कर-घटिकाशतक-धर्माचार्य-महामहोपदेशक-सुकवि-साहित्याचार्यप्रभृतिविविधोपाधिविभूषितः पं.अम्बिकादत्तव्यासः स्वप्रणीतासु अशीतिषु कृतिषु अन्यतममेतिह्यं वीरशिवचरितमाश्रित्य द्वादशसु निःश्वासेषु घटितं 'शिवराजविजयः' इति उपन्यासं त्रिहायनसाधनया रचयामास। कतिपयैः संस्कृतसाहित्यकारैरयमेवोपन्यासः संस्कृतभाषाया आद्य उपन्यासो मन्यते। एषः काशीतः 1901 ईसवीये प्रकाशतामवाप।

8. भट्टनारायणशास्त्री (1860 - 1911)

तमिलनाडुप्रान्तस्य तञ्जौरान्तर्गतनाडुकावेरीवास्तव्यो 'भट्टश्री-बालसरस्वती' च इति विरुदद्वयविभूषितो भट्टनारायणशास्त्री 'सीमन्तिनी' (1895-1896) इति उपन्यासं प्रणिनाय। अयमुपन्यासः 'सहृदया' इति मासिकपत्रेण तृतीयखण्डे प्रकाशितः। अथ असौ 'आचार्यचरितम्' इति शङ्कराचार्यस्य जीवनचरितमपि लिलेख।

9. उपेन्द्रनाथसेनः रायचतुर्धुरीणः (1865)

कोलकातानगरस्य समीपे बाखरगञ्जग्रामवास्तव्यः कोलकातासंस्कृतकॉलेजप्रधानाध्यापको बंगलाभाषाविरचितैरुपन्यासैः अभिभूतः उपेन्द्रनाथसेनो रायचतुर्धुरीणः त्रीन् उपन्यासान् लिलेख। ते च इमे सन्ति - 'मकरन्दिका' (1894), 'कुन्दमाला' (1894), 'सरला' (1896) च। एते उपन्यासाः संस्कृतचन्द्रिकापत्रे प्रकाशतामापुः।

10. मनुजेन्द्रदत्तः (1868)

कोलकातावास्तव्यः 'संस्कृतचन्द्रिका' इति पत्रस्य कार्याध्यक्षो मनुजेन्द्रदत्तः पञ्चाशत्सु पृष्ठेषु सामाजिकमितिवृत्तमाश्रित्य इन्द्रप्रियायाः तत्सुतायाश्च पीडापूर्णं जीवनं प्रकाशयन् 'सतीच्छाया' (1895) इति उपन्यासं प्रणिनाय।

11. परवस्तुरङ्गाचार्यकृष्णमाचार्यः (1869 - 1924 ई.)

परवस्तुरङ्गाचार्यसुतः त्रिशिरपुरमद्रासवास्तव्यः संस्कृतपाठशालाधीक्षकः अभिनवभट्टबाण-शब्दालङ्कारविद्याभूषणभट्टाचार्य-ब्रह्मश्रीरिति विरुदविभूषितः कृष्णमाचार्यः षष उपन्यासान् प्रणिनाय। तेषु चत्वारः - पतिव्रतम्, आर्तनारी, सुशीला, पाणिग्रहणम् चेति सामाजिकवृत्तमाश्रित्य 'वररुचिः' (1908), 'चन्द्रगुप्तः' (1909) च ऐतिहासिकं प्रथितं वृत्तमुजीव्य प्रणीताः।

12. ए.कुप्पुस्वामी आर्यः (1870)

तमिलनाडुवास्तव्यो महामहोपाध्यायविरुदविभूषितः कुप्पुस्वामी 'सुलोचना' (1909) इत्यभिधेयम् उपन्यासं प्रणिनाय। अस्मिन् नारीणां शोषणपरं दयनीयं शोचनीयं संवेदनीयञ्च जीवनमुपन्यस्तम्।

13. शेषशायी शास्त्री (1870 - 1932)

तमिलनाडुवास्तव्यो बालकविविरुदविभूषितः महाविद्यालयप्राध्यापकः संस्कृतपण्डितः 'अष्टावक्रीयम्' (1932) इति अष्टावक्रकथावृत्तमवलम्ब्य उपन्यासं रचयामास।

14 बलभद्रशर्मा (1871)

मथुरावास्तव्यो देवकीनन्दनसुतः कवि-काव्यरत्नाकराविति विरुदद्वयविभूषितो बलभद्रशर्मा 'वियोगिनी बाला' (1906) इति सामाजिकमुपन्यासं प्रणिनाय। अस्मिन् सामन्तवादस्य अत्याचारैः नारीणां सन्त्रस्ता मूकवेदना बलभद्रशर्मणो प्रतिभाभव्यभारया लेखनकलया प्रस्फुटिता।

15. व.अनन्ताचार्यकोडम्बकम् (1871)

तमिलनाडुवास्तव्यः पचिदयप्पामहाविद्यालयप्राध्यापको व. अनन्ताचार्यकोडम्बकम् उदयनचरितम् (1947) चन्द्रपीडचरितं रघुवंशचरितं हर्षचरितसारः इति ऐतिह्यविषयकानुपन्यासान् प्रणिनाय।

16. भट्टरमानाथशास्त्री (1875)

मुम्बयीवास्तव्यो द्वारकानाथतनयो भट्टरमानाथशास्त्री 'दुःखिनी बाला' (1905) इति उपन्यासञ्चकार। अस्मिन् नराणां राज्यशासनपरा स्वार्थसाधनसाधिका प्रवृत्तिः प्रदर्शिता वर्तते।

17. हरिदाससिद्धान्तवागीशः (1876-1936)

कश्यपगोत्री बङ्गवास्तव्यो 'गंगाधरविद्यालङ्कारविधुमुखी' इत्यनयोस्तनयः आंग्लशासनाल्लब्धमहामहोपध्यायविरुदो हरिदाससिद्धान्तवागीशः 'सरला' (1876) इति सामाजिकमुपन्यासं प्रणिनाय।

18. नरसिंहाचार्यपुणेकरः (1876)

मैसूरवास्तव्यो नरसिंहाचार्यपुणेकरः अष्टसु अध्यायेषु मगधराजशूरसेनस्य राजसुतासौदामिन्याः च प्रणयपरिणयकथामाश्रित्य 'सौदामिनी' (1914) इत्यभिधेयमुपन्यासं लिलेख।

19. श्रीमती राजम्मा (1877)

गंगाधर-रामालक्ष्म्योस्तनया ए.सम्बशिवाय्यरस्य भार्या मैसूरवास्तव्या श्रीमती राजम्मा सामाजिकजीवने कुरीतिदोषजातमालोचयन्ती 'चन्द्रमौलिः' इति उपन्यासं प्रणिनाय।

20. नगेन्द्रनाथसेनः (1880)

सिद्धान्तरत्नविरुदविभूषितः आर्यप्रभापत्रस्य सम्पादको नगेन्द्रनाथसेनः सामाजिकदुर्नीतिनिन्दकं 'कल्याणी' (1918) इत्याख्यमुपन्यासं प्रणिनाय।

21. परशुरामवैद्यः (1880)

महाराष्ट्रवास्तव्यो सहृदयापत्रस्य लेखकः परशुरामवैद्यः 'विजयिनी' (1909) इत्याख्यमुपन्यासं लिलेख।

22. ए.राजगोपालचक्रवर्ती (1882-1934)

सरलकवि-सूर-काव्यविशारद-विद्याभूषण-विद्यावाचस्पति-महाविद्वन्-ज्ञानगुणाकरेत्याधिभिः भूषितो मैसूरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः ए. राजगोपालचक्रवर्ती 'शैवालिनी' (1971), 'विलासकुमारी' (1934), 'संगरः' 'कुमुदिनी' (1934) चोपन्यासान् चकार।

23. चिरक्यल-रामवर्म-वलिय-तम्बुरानः (1881-1952)

रामवर्मकोइतम्बुरानतनयः, केरलवास्तव्यः चिरक्यलरामवर्मवलियतम्बुरानः 'वनमाला' (1952) इति उपन्यासं प्रणीतवान्।

24. कपिस्थलकृष्णामाचार्यः (1883-1933)

आन्ध्रप्रदेशवास्तव्यः आचार्यकुलजन्मा रंगनाथाचार्यसुतो लब्धकविरत्नविरुदः अष्टादशप्रकरणेषु गुम्फितं 'मन्दारवती' (1929) इति उपन्यासं चकार।

25. मेधाव्रतशास्त्री (1883-1964)

नासिकजनपदे लब्धजन्मा गुरुकुलेषु अधीतः आर्यसिद्धान्तमर्मज्ञो विपुलं साहित्यं प्रणयन्, षोडशसु कलासु विभक्तं विद्वत्पूजितं 'कुमुदिनीचन्द्रः' (1919) इति उपन्यासं लिलेख। इदं चन्द्रसिंहकुमुदिन्योः ऐतिह्यं प्रणयवृत्तमाश्रित्य प्रणीतमद्वितीयमुपन्यासकाव्यमस्ति।

26. सूर्यनारायणशास्त्री (1883-1951)

हरियाणाप्रदेशे लब्धजन्मा जयपुरे शिक्षामवाप्य महाराजासंस्कृतमहाविद्यालये प्राध्यापकः सन् सूर्यनारायणशास्त्री 'वीरमतिः' (1909) इत्याख्यं नारीचरित्रोद्भावकमुपन्यासं प्रणीतवान्।

27. मुडुम्बेश्रीनिवास आचार्यः (1887)

श्रीवत्सगोत्री राघवाचार्यसुतः तमिलनाडुवास्तव्यो मुडुम्बे श्रीनिवास आचार्यः तमिलसाहित्यस्य कथ्यं भावञ्च आश्रित्य मणिमेखला प्रवासवल्ली कैरविणी चैतद् उपन्यासत्रयं लिलेख।

28. भट्टमथुरानाथशास्त्री (1890-1960)

गौतमगोत्री द्वारकानाथतनयो जयपुरसंस्कृतशिक्षाधीक्षको भट्टमथुरानाथशास्त्री 'आदर्शरमणी' (1905), 'अनादृता' असमसाहसञ्चेति उपन्यासत्रयं प्राणयत्।

29. बालकुन्नन् वासुदेवनम्बूदरी (1891-1946)

केरलवास्तव्यो रामअडतिरिसुतः संस्कृतपाठशालासु अधीतविद्यो भक्तिशिरोमणिविरुदविभूषितो बालकुन्नन् वासुदेवनम्बूदरी नारीवेदनाख्यापकं 'सुभद्रा' (1946), इत्याख्यमुपन्यासं लिलेख।

30. नारायणशास्त्री खिस्ते (1892)

काशीपुर्यां लब्धजन्मा भैरवपन्तसुतः साहित्याचार्यो नारायणशास्त्रिखिस्ते 'दरिद्राणां हृदयम्' (1930) 'दिव्यदृष्टिः' (1936) चेति उपन्यासद्वयं प्रणिनाय।

31. जगदीशचन्द्रप्राणशंकर आचार्यः (1911)

(12.7.1911) ईसवीये सौराष्ट्रदेशे लब्धजन्मा, माघपुरस्कारेण सभाजितो जगदीशचन्द्रप्राणशंकर आचार्यो 'मकरन्दिका' (1984) इति उपन्यासं कादम्बरीशैलीमनुकृत्य प्रणीतवान्। उपन्यासोऽयं उत्तरप्रदेशसंस्कृताकादम्या प्रशस्तिपत्रेण सम्मानितः।

32. डॉ.दुर्गादत्तशास्त्री (1971)

(08.08.1917) ईसवीये हिमाचलप्रदेशस्य नलेटीग्रामे आप्तजन्मा, व्याकरणालङ्कारज्योतिष्षु विशिष्टो विद्यालङ्कारसाहित्यरत्नोपाधिभ्यां भूषितो, राष्ट्रियशिक्षकपुरस्कारेण राष्ट्रपतिना सम्मानपत्रेण चाभिनन्दितो डॉ.दुर्गादत्तशास्त्री 'वियोगवल्लरी' इत्याख्यमुपन्यासं प्रणिनाय, अथ रचनयानया एव राष्ट्रपतिपुरस्कारेण मानितः।

33. प्रो.रामजी उपाध्यायः (1920)

संस्कृतिजगति लब्धप्रतिष्ठः उत्तरप्रदेशस्य बलियाजनपदान्तर्गते बलिया ग्रामे प्रो. रामजी उपाध्यायोऽजायत। शिक्षासोपानानि आरुह्य सागरविश्वविद्यालये अध्यापनसेवां प्रददानोऽयं 1980 ईसवीये सेवाविमुक्तो बभूव। अयं पञ्चत्रिंशन्मितासु कृतिषु अन्यतरौ 'द्वा सुपर्णा' (1960) 'सत्यहरिश्चन्द्रोदयम्' (1995) चेति उपन्यासावपि प्रणिनाय। 'सत्यहरिश्चन्द्रम्' इति उपन्यासकृतिः अखिलभारतीयमौलिकसंस्कृतसाहित्यरचनासंस्थानेन पुरस्कृता वर्तते। उभयोरेव उपन्यासयोः कथानकं पौराणिकं वर्तते

34. डॉ.शिवप्रसादभारद्वाजः (1922)

देहरादूनवास्तव्यः पञ्जाबसाहित्यशिरोमणिपुरस्कारपुरस्कृतो विविधमानमानितो डॉ. शिवप्रसादभारद्वाजः सामाजिकविषयमवलम्ब्य 'बन्धुजीवम्' इति नारीसद्भावसमुत्प्रेरकम् उपन्यासं प्रणिनाय। एतच्च राष्ट्रियसंस्कृतसंस्थानस्यानुदानेन 2004 ईसवीये प्रकाशितम्।

शेषभागः सप्तमपुटे

# मानसूनपञ्चकम्

-अरविन्दः

बालास्तपन्ति सदने शृणु चोष्णवातैः
हा शुष्यतीव मुखपङ्कजकान्तिरेषा।
स्वेदाब्धिमग्नमनुजो ननु वीक्षते त्वां
रे मानसून! गतवानसि कुत्र मित्र?।। 1

खे खेचरो न रमते न जलेषु मीनो
नो दृश्यते सरसि हन्त जलस्य बिन्दुः।
गोमाहिषादितनुतापमये प्रपश्यन्
रे मानसून! श्रितवान् श्वशुरालयं किम्??2

शुष्का लता वसुमती जलमिच्छतीयं
चुं चुं करोति चटका जलमाप्तुकामा।
किन्तु प्रमत्त! तव कर्णयुगं प्रसुप्तं
रे मानसून! मृतवान् किमु सूर्यतापैः? 3

वृद्धा म्रियन्त इव हा शिशवो म्रियन्ते
गौरं वपुर्भवति कृष्णमहो जनानाम्।
त्वां पश्यतो मम मनो ददतेऽद्य तालिं
रे मानशून्य! शठ! पामर! पश्य लोकम्।। 4

केचिद् दयार्द्रजलदास्त्वरितं द्रवन्तो
वर्षन्ति केचिदपरे जनवन्द्यमानाः।
वर्षन्ति ये न समये सलिलं खलास्ते
रे मानसून! बहु वर्ष मदीयदेशे।। 5

## वोधकथा

एकः ग्रामः आसीत्! तस्मिन् ग्रामे एकः धनिकः निवसति स्म!

सः महान् धनिकः, तस्य एकं सुन्दरं भवनम् आसीत्! तस्य पत्नी, पुत्राः, सेवकः च आसन्!

कृषिभूमिः अपि आसीत्!

तस्य सर्वमपि आसीत् चेदपि सः रात्रौ निद्रां एव कर्तुं न अशक्नोत्!

एकदा सः स्वगृहे उपविष्टवान् आसीत्, चिन्तनं कुर्वन् आसीत्! तस्मिन्नपि दिने तस्य निद्रा न आगता!

किमर्थम् एवं भवति इति तस्य मनसि महती चिन्ता उत्पन्ना!

तस्मिन्नेव समये सः दूरतः एकं गीतं शृणोति स्म! गीतं मधुरम् आसीत्!

कः एवं गायति इति सः न जानाति, तथापि सः पश्यामि इति चिन्तयित्वा गीतस्य ध्वनिं अनुसरन् अग्रे अग्रे गच्छति स्म!

तस्य गृहस्य समीपे एव एकं कुटीरं पश्यति स्म! तस्मिन् कुटीरे कश्चन निर्धनः आसीत्!

सः तत्र शयनं कृत्वा भित्तिम् आलम्ब्य उच्चैः गायन् आसीत्!

सन्तोषेण सः गायति स्म!

तद्दृष्ट्वा धनिकस्य महद् आश्चर्यम् अभवत्!

अतः स धनिकः निर्धनं पृष्टवान्! भो मित्र! भवान् एतावता आनन्देन गायन्नस्ति , भवतः आनन्दस्य कारणं किम् इति!

तदा निर्धनः हे महाशय मम समीपे धनं किमपि नास्ति सत्यम्, एतद् अहं जानामि! किन्तु अहं बहिः पश्यामि, प्रकृतिं पश्यामि, इदानीं प्रकृतिः कथं शोभते! वसन्तकालः अस्ति, सर्वत्र पुष्पाणि विकसन्ति मधुमक्षिकाः, भ्रमराः च सञ्चारं कुर्वन्ति, तदेव अहं पश्यामि इति!

भवान् किं करोति इति निर्धनः धनिकं पृष्टवान्!

मम तु सर्वम् अस्ति परन्तु तथापि मम निद्रा न आगता इति धनिकः उत्तरं कथितवान्!

मम समीपे तत् नास्ति, एतत् नास्ति, यद्यपि भवतः समीपे बहु अस्ति तथापि भवान् यत् नास्ति तस्य विषये एव चिन्तनं करोति अतः दुःखम् अनुभवति! अहं तु यद् अस्ति तस्य विषये एव चिन्तनं करोमि, अतः अहं सुखम् अनुभवामि इति निर्धनः वदति स्म!

तस्य निर्धनस्य वचनं श्रुत्वा धनिकस्य ज्ञानोदयः अभवत्!

सत्यमेव खलु!

वयं सर्वदा अपि यद् अस्ति तस्य विषये यदि चिन्तनं कुर्मः चेत् सुखम् अनुभवामः एव इति!!

-प्रदीपः

# नवीनशिक्षानीतौ संस्कृतभाषानीतिः

डॉ. सुरेन्द्रमोहनमिश्रः, कुरुक्षेत्रम्।

।।त्रिभाषासूत्रे राष्ट्रक्षेमाय संस्कृतं
द्वितीया अपरिहार्यभाषा भवेत्।।
संस्कृतकल्याणराष्ट्रकल्याणमित्राणि मित्राणि !
नमो वः यत्र कुत्रापि देशे विदेशे वा !!
साक्षाद् आरभे --
पूर्वं त्वाङ्ग्ल्याः संस्कृतमारभेत
स एव राष्ट्रार्थ इतीह विद्वन्।
भाषाविदां तन्मतमेव पुष्टं
भाषा नवा सिध्यति चाष्टमायुः।।१
नालङ्कृतिः संस्कृतमेव राष्ट्रे
न तत्कुलीने वलिवैश्वदेवम्।
चरित्रनिर्मातृ तदार्यदेशे
तद्राष्ट्रवादस्य समस्तमूलम्।।२
अमन्तवो मां त उपक्षियन्ति
वागाह साम्भृण्यथ नोऽनवद्या।
राष्ट्रीं विना राज्यशक्तिः कृतघ्ना
देशे नाट्यं त्वपसंस्कृत्यमायाः।।३
गतोपि न गतो हन्त मैकलेऽस्मासु जीवति।
भुङ्क्तेस्मदन्नपानानि मूलानि नोऽपि कृन्तति।।४
शिक्षानीतिसमित्यां भोः संस्कृतज्ञो न दृश्यते।
निर्धारयन्ति के धन्याः शिक्षां भारतसंस्कृतौ।।५
ब्रिटिश्काले यथा सुस्थाः सराद्युपहिता धियः।
मौनमासुः संस्कृतस्य पातने क्व कृतज्ञता।।६
वाणी यदि सरस्वत्या प्रत्ता सा न गिरेत्सताम्।
सत्यं राष्ट्रहितं वाणी किमपुष्पफला न नः।।७
संस्कृतज्ञाः संस्कृतिज्ञा यतयो भारतात्मगाः।६
विश्वगुरत्ववक्तारः कथं न संस्कृतेच्छवः।।८
मोदी समर्थतम इत्यपि नास्ति शङ्का
मोदी स पूजयति संस्कृतमेव सत्यम्।
पञ्चाशदत्र विगताऽऽङ्ग्लवचः शिशूनां
प्राथम्यतोस्ति किमु कारणमत्र पृच्छ्यम्।।९
सा नाचिकेतसी श्रद्धा राष्ट्रात्मभावनावृता।
मां प्रेरयति प्रष्टुं तां समितिं हेतुसाध्यताम्।।१०
कवीनां शास्त्रिणां काव्यशास्त्रयोर्न मुमूर्षिता।
मुषिता नापि तच्चाम्बासरस्वतिपयःस्मृतिः।।
लवङ्ग्यो यदि वा लभ्याश्चाटुकारैरसंशयम्।
काव्यशास्त्रे समाजाय राष्ट्रायेति नु विस्मृतम्।।
तद्भोः प्रेरयत प्राणान् राष्ट्रस्य कृतिभिः पुनः।
देववाणी द्वितीयास्तु न तृतीया विकल्पिता।।११-१३
स्वराष्ट्रभक्तो यदि मैकलेसौ
निहन्ति वाणीं संस्कृतां स्वराज्यतः।
के ते वयं राष्ट्र उदारविक्रमाः
का राष्ट्रभक्तिर्वत नः स्वधर्मतः???।।१४
पीठेषु शङ्करान् रामानुजान् मध्वांश्च वल्लभान्।
निम्बार्कान् वैष्णवान् गौडान् शाक्तान् शैवांस्तथेतरान्।।
प्रार्थये प्रार्थयन्तां ते वाऽऽदिशन्तु सुशासकान्।
भूयात्संस्कृतभाषा सा द्वितीया नाङ्ग्लगौः तु नः।।१५-१६

# नरेन्द्रमोदीखलुराष्ट्रवादी



-प्रो. चौडूरि उपेन्द्रावः,
संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलाल नेहरू विश्वविद्यालयः,
नवदेहली, भारतम्, 9818969756
skt.scholar@gmail.com

समस्तानां नृणां समुचितविकासेन सततं
नवाभिर्नानाभिर्जनगणमताभिर्विजयते।
नरेन्द्रस्सर्वैरप्यनवरतसंस्तुत्यचरितो
सदा सत्कार्याणां ततिभिरनवद्योऽयमधुना।।
नरेन्द्रोऽखिलेस्मिन्जगत्युज्ज्वलोऽभू
त्प्रशस्तस्य राष्ट्रस्य सूनुः प्रकृष्टः।
दुरुद्देश्यपूर्णं दलं कान्ग्रेसाख्यं
पराभूतमेतेन नेत्रा स्वशक्त्या।।
मोदी भारतनायकस्सुचरितामग्रेसरः केसरी
धीशालिर्महनीयमूर्तिरचलोध्दण्डप्रचण्डद्युतिः
विस्तीर्णेऽखिलराजनीतिजलधौ चन्द्रायतेऽयंजनो
नानायुक्तिसमन्वितः स्थिरमतिर्दामोदरस्सौख्यदः।।
विहाय भ्रातरं भार्यां गेहं ग्रामं स्वमातरं।
समर्पितमनेनात्र जीवनं भारताय वै।।
नेत्रानेन समारब्धाः जनसौख्यप्रदायिकाः।
योजनास्तासु सर्वासु योजनैका सुविश्रुता।।
दारिद्र्योन्मूलनार्थं हि कृतैषा धनयोजना।
जनानां धनवृध्यर्थमेषा सुविदिताऽभवत्।।
योगस्यातिविशिष्टतत्ववलितस्यापि प्रभूतं यश
स्सर्वत्रैव यदि प्रचारसरणिं प्राप्तं जगत्यां भृशं
तन्नेत्रा खलु मोदिना प्रतनुतं योगस्य तेजः पुनः
मन्येऽसावखिलप्रजाप्रतिनिधिष्वग्रेसरस्सक्षमः।।
योगोनामजनस्यरूपमधिकंयोगोहिगुप्तंधनं
योगोबन्धुरसौविदेशगमनेयोगोगुरूणांगुरुः ।
योगादेवविनिर्जिताःखलुनृणांचित्तस्यदोषास्ततो
योगात्सौख्यमनन्तमद्भुतमितिप्रोक्तंसदामोदिना ॥
नरेन्द्रमोदीखलुस्वच्छवादी
जनाभिमानेनसमृद्धशक्तिः ।
प्रमत्तवादभ्रमछद्मवेधी
सदाजयत्युज्वलराष्ट्रवादी ॥
यथाप्रचण्डवेगेन वायुना ग्रासराशयः।
दिक्षु सम्पातिताभूत्वाक्रमेणादृश्यतां गताः ॥
तथैव मोदिना नेत्रा प्रभंजनसमेन सः।
कन्हय्याख्यःपराभूतःखलुतेजस्विनाभृशम्॥
अन्येऽपि बहवस्तत्र मोदिना हि तृणीकृताः।
क्षिप्तास्ते भारते वर्षे मिथ्यायूथान्विताःखलु॥
पुनः प्रधानमन्त्रित्वं प्राप्योद्घोषितमेवयत् ।
विकासेनसहैवाद्यविश्वासोऽपीतिमोदिना ॥
नरेन्द्रमोदीसततोज्वलस्स
न्नयेनप्राप्नोतुपदंप्रधानं ।
विनम्रभावेनमयाकृतैषा
सुपद्यमालासुरवाग्विचित्रा ॥
नानागुणैर्मणिमयैरिहमण्डितेऽस्मि
न्नारोग्य-धैर्य-विभवादिसुखप्रकर्षः ।
सत्कीर्तिरस्तुविपुलाह्यमला च शक्तिः
सौभाग्यमस्तुधनमस्तुसदैवदिव्यम् ॥

# मनसा धनी

**सेवासम्बन्धितः प्रेरणाप्रद-प्रसङ्गः**

प्रसिद्धः आङ्ग्लोपन्यासकारः डा. क्रोनिनः साधारण-परिवारे जातः। सीमितोपार्जनस्य कारणतः दरिद्राणां साहाय्ये सर्वदा तत्परः आसीत् सः। तदा कस्यापि कष्टं वीक्ष्य तस्य मनः करुणया द्रवीभूतं भवति स्म।

कालान्तरे तेन बहुधनं सम्पादितम्। तदा सुखमग्नः सः दरिद्राणां विषयमपि विस्मृतवान्। तस्य पत्नी अत्यन्तं धर्मशीला आसीत्। तया पत्युः धनाहङ्कारभावः अवगतः।

एकदा सा पतिम् उक्तवती- न जाने, भगवान् कस्य पापस्य कारणेन अस्मान् दरिद्रान् कृतवान् इति। 'दरिद्रः' इति शब्दस्य श्रवण-समनन्तरमेव सः पत्न्यै क्रुद्धः जातः, उक्तवान् च - भगवता अस्मभ्यम् अपारा सम्पद् दत्ता वर्तते, एवं स्थिते भवती कथं दरिद्राः वयम् इति वदति ?

पत्नी उक्तवती- धनी धनेन न भवति कोपि अपितु मनसैव भवति। यस्य हृदि न दया, न धर्मश्च, एतादृशः जनः तु दरिद्रः एव सर्वदा। किं विगतेषु पञ्चवर्षेषु दरिद्राणां दुःखं दृष्ट्वा भवतः हृदयं द्रवितम् अभूत् ? कस्यापि सेवा-साहाय्यं भवता कृतम् ?

पत्न्याः वचनं श्रूयमाणस्य डा. क्रोनिनस्य नेत्रे उद्घाटिते इव सञ्जाते। ततः सत्वरं सः अधिकांशधनं अनाथालयाय चिकित्सालयाय च प्रदत्तवान् आसीत्।

(हिन्दीकल्याणपत्रिकातः संस्कृतानुवादोयम्)

-नारदः।

तृतीयपुटस्य शेषभागः

# गुरुसमर्चनं....

शक्तिमुक्तिभुक्तिदा सुधानपायिनी इयं
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम्
सादरं समीयताम्
वन्दना विधीयताम्

श्रूयते चन्द्रशेखर-आजादः, भगतसिंहः अन्ये बहवः यथा ऋषिकल्पदयानन्दः, बालगंगाधरतिलकश्चान्ये संस्कृतविज्ञातारो भारतीयस्वतन्त्रतासंग्रामे महद् योगदानं दत्तवन्तः। तान्नुस्मरन् निजदेशसेवायै भुशुण्डीं करे धृत्वा सीम्नि शत्रून् निहन्तुमुद्यतोऽस्मि। किं वाभिमतं गुरुवर्याणाम्?

गुरुः-- वीर! चिरञ्जीवी भव! सत्यं त्वया चिन्तितमस्ति। संस्कृतं शिक्षयति 'वयं राष्ट्रे जागृयाम' पुत्र! राष्ट्रसेवा सर्वश्रेष्ठा सेवा मन्यते,

श्रूयताम्--

देशसेवा कृता येन नित्यं सुखं
तस्य दिव्यं मतं जीवनं भूतले।
सैव वन्द्यः स्वदेशस्य वीरो मया
सीम्नि यो देशरक्षां करोति द्विषः।।

शम्भुः- गुरुवर! अस्मिन् मनोरमे काले वर्षति मेघे शिखिध्वनौ कजलीगीतं गातुम् अयं करीमः, इयं दीक्षा अन्ये च वयं सर्वे समुत्सुका वर्तामहे। आदिशन्तु गुरुमहोदयाः!

गुरुः-- अहो! गीयतां गीयताम्।

बालकाः- ( गायन्ति)

सखि श्यामला जने जने मुदावहा
घनावली समागताधुना
मत्तबर्हिणो वनेषु मत्तपक्षिणो द्रुमेषु
मुग्धबालकाः प्रफुल्लिता गृहे गृहे
घनावली समागताधुना
सखि'''
न तमो भुवं जहाति नो दिनं दिनं विभाति
भानु-भानवो दिवंगताः पलायिता
घनावली समागताधुना
सखि--
पादपेषु पल्लवेषु कुञ्जवल्लरीवनेषु
भूतलेऽखिलेऽभिरामतां वितन्वती
घनावली समागताधुना

अस्तु अधुना दीक्षा नावलोक्यते।

अनिलः- गुरुदेव! विलम्बेनागता सा पृष्ठे समुपासीना सर्वं ध्यानेन आकर्णयति।

गुरुः-- तां वादय।

अनिलः-- भगिनि दीक्षे! संस्कृतप्रचाराय यत् कार्यं तुभ्यं दत्तमस्ति, तत् पूर्णं कृतं न वेति श्रावय।

दीक्षा-- हे गुरुवर्य! सश्रद्धं नौमि! महिलानां संस्कृतसम्भाषणशिविरसंचालनाय मया गृहीतकार्यं मनोयोगेन कृतमस्ति। इमाः पञ्चाधिका भगिन्यः पारंगताः संस्कृतसंभाषणशिविसंचालनाय। आज्ञापयन्तु किमग्रे करणीयमस्ति?

गुरुः-- पुत्रिके दीक्षे! अनेन कार्येण जिता वयं त्वया। अत्यन्तमेव सुखदं वृत्तं श्रावयसि। अधुना मम स्वप्नः साकारो भवतीति मन्ये।

ग्रामे वनेषु नगरेषु च सौधकेषु
याने वदन्तु मनुजा मृदुदेवभाषाम्।
येन प्रियां प्रकुरुत प्रततं प्रतानं
तत्कामये प्रतिपलं न तु चान्यदत्र।।

(सर्वान् विलोकयन्)

अन्तेवासिनः शिष्याः! विहाय भयं, त्यक्त्वा लज्जां हित्वा शंकां अविगणय्य पिपासां सुखं दुःखं चेति प्रचारयत संस्कृतं प्रसारयत सुरभारतीं सर्वत्र, येन भारतीया संस्कृतिः पुना राजतां संरक्षिता च तिष्ठेत्, पुनर्भारतं विश्वगुरुपदं प्राप्नुयादिति।

(सर्वे समुत्थाय गायन्ति)

भारतीयैकता साधकं संस्कृतं
भारतीयत्वसम्पादकं संस्कृतम्।
ज्ञानपुञ्जप्रभादर्शकं संस्कृतं
सर्वदानन्दसन्दोहदं संस्कृतम्।।
नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी
सदने सदने जनजनवदने जयतु चिरं कल्याणी।
सत्यशीलसौन्दर्यसमीरा ज्ञानजला गतिसारा
छलछलकलकल प्रवहतु दिशि दिशि पावनसंस्कृतधारा।
पावनसंस्कृतधारा
अमरवाणी विजयताम्
अमरवाणी विजयताम्

इति शुभम्।

पंचमपुटस्य शेषभागः

# संस्कृतसाहित्यस्योपन्यासपरम्परा

35. श्रीनाथश्रीपादहसूरकरः (1924)

'संस्कृतभारतरत्नमाला' इति शृङ्खलायाः प्रणेतुः श्रीपादहसूरकरस्य तनयः श्रीनाथश्रीपादहसूरकरस्य जन्म मध्यप्रदेशस्य इन्दौरनगरे 15.02.1924 ईसवीयेऽभवत्। संस्कृतसाहित्यसमाराधयिता काव्यतीर्थ-साहित्याचार्यविरुदद्वयविभूषितोऽयं पञ्चोपन्यासान् प्रणिनाय इति ज्ञायते परमेषु त्रय एव पूर्णत्वेन प्राप्ताः। तेषां सवेषां नामानि चेमानि - सप्तसिन्धुकन्या, अजातशत्रुः दावानलः, प्रतिज्ञापूर्तिः, चेनम्मा च।

36. डॉ.कृष्णकुमारः (1925)

उत्तरप्रदेशस्य मुरादाबादजनपदे श्रीभूषणशरणस्य तनयो डॉ. कृष्णकुमारः 10.02.1925 ईसवीयेऽजायत। स्वीयमध्ययनं परिसमाप्य नैकेषु स्थानेषु अध्यापयन्नयं गढ़वालविश्वविद्यालयस्य संस्कृतविभागाध्यक्षपदमलङ्कुर्वाणः 1985 ईसवीये सेवानिवृत्तो जातः। अयं शकुन्तलोपाख्यानमाश्रित्य 'तपोवनवासिनी' इत्याख्यमुपन्यासमलिखत्, यः उत्तरप्रदेशसंस्कृतसंस्थानेन बाणभट्टाभिधेयेन प्रथमपुरस्कारेण पुरस्कृतः। इह शकुन्तलाचरितेन नारीगरिमा प्रस्तुतः।

37. रामकरणशर्मा (1927)

आधुनिकसंस्कृतसाहित्यकारेषु मूर्धन्यो रामकरणशर्मा कैलिफोर्नियाविश्वविद्यालयस्य चेण्क्ष उपाधिभूषितः चतुर्णां विश्वविद्यालयानाम् उपकुलपतित्वं निदेशकत्वं, केन्द्रीयहिन्दीसंस्थानस्य बिहारप्रशासनिकसेवायाः च आजीवनं सदस्यतामावहन् राष्ट्रपतिपुरस्कारप्रभृतिभिः मण्डितोऽयं सुरभारतीसमुपासकः सामाजिकीं राष्ट्रियां च समस्यामधिकृत्य 'सीमा' (1987), 'रयीशः' (1994) चेति उपन्यासद्वयं प्रणिनाय

38. मोहनलालशर्मा पाण्डेयः (23.07.1934)

राजस्थानसंस्कृताकादम्या माघपुरस्कारेण, वैदिकसंस्कृतप्रचारकसंघद्वारा शास्त्रमहोपाधिरुपाधिना भूषितो मोहनलालशर्मपाण्डेयः सुरभारतीं सेवमानः ऐतिह्यवृत्तमाश्रित्य 'पद्मिनी' इति उपन्यासं प्राणयत्। एष उपन्यासः वाचस्पतिपुरस्कारेण पुरस्कृतो वर्तते।

39. डॉ.हरिनारायणदीक्षितः (13.01.1936)

अभिनवबाणाविरुदविभूषितः साहित्ययोगसांख्यव्याकरणशास्त्रनिष्णातः उत्तरप्रदेशसंस्कृतादम्या 'वरिष्ठविद्वान्' इति पुरस्कारेण पुरस्कृतो डॉ.हरिनारायणदीक्षितो दीनबालकस्य कल्पितकथानकमाश्रित्य 'गोपालबन्धुः' इत्याख्यमुपन्यासं लिलेख।

40. आचार्यः कलानाथशास्त्री (15.07.13.936)

जयपुरवास्तव्यो भट्टमथुरानाथशास्त्रिणो ज्येष्ठसुतो राजकीयभाषाविभागनिदेशकः, साहित्यमहोदधि -साहित्यश्रीप्रभृतिभिरुपाधिभिश्शोभितः आचार्यः कलानाथशास्त्री कल्पनाप्रसूतं वृत्तमाश्रित्य प्रणयप्रधानं 'जीवनस्य पृष्ठद्वयम्' इति उपन्यासं प्रणिनाय।

41. डॉ.रामकिशोरमिश्रः (23.02.1938)

उत्तरप्रदेशस्य एटाजनपदे जातो होतीलालस्य तनयो डॉ. रामकिशोरमिश्रः करुणरसप्रधानं दुःखान्तम् 'अन्तर्दाहः' इति उपन्यासं प्राणयत्।

42. आचार्य उमेशशास्त्री (1941)

जयपुरवास्तव्यो बहुश्रुतो विद्वान् आचार्य उमेशशास्त्री भावप्रधानं 'बिल्वमङ्गलम्' इति काल्पनिकवृत्तमाश्रितमुपन्यासं प्राणयत्।

43. डॉ.जीतसिंहखोखरः (15.01.1955)

पंजाबप्रदेशान्तर्गतभटिण्डाजनपदवास्तव्यः चरणसिंहस्य तनयो जीतसिंहः खन्नानगरस्य श्रीसरस्वतीसंस्कृतमहाविद्यालये अधीयानः शास्त्रिश्रेण्यां स्वर्णपदकं प्राप्तवान्। अथ हिन्दी-पञ्जाबी-आंग्लभाषासु स्नातकोत्तरश्रेणीः उत्तीर्य चेण्क्ष उपाधिं लब्धवान्। अयं नारीसंघर्षपरिचायकं कल्पनाप्रसूतवृत्तमवलम्ब्य 'प्रीतिः' इति उपन्यासं लिलेख। अयं नाभाजनपदस्य राजकीयविद्यालये आचार्यपदम् अलञ्चकार।

44. आनन्दवर्धनरामचन्द्ररत्नपारखी

अयं 1961 ईसवीये उद्भ्रान्तयूनां पाश्चात्यानुकुर्वन्तीनां स्त्रीणां च आचरितमाश्रित्य 'कुसुमलक्ष्मीः' इति उपन्यासं प्राणयत्।

45. डॉ.केशवचन्द्रदासः (05.03.1955)

ओडिसावास्तव्यो बहुविधकाव्यकलाकोविदो जगन्नाथसंस्कृतविश्वविद्यालयस्य न्यायदर्शनविभागाध्यक्षो डॉ. केशवचन्द्रदासः त्रयोदश उपन्यासान् प्राणयत्। ते च इमे सन्ति- तिलोत्तमा, निकषा, शान्तिः, अरुणा, आवर्तम्, ऋतम्, शीतलतृष्णा, प्रतिपद्, अञ्जलिः, शिखा, मधुयानम्, विसर्गः, शशिरेखा च।

46. श्रीनिवासशास्त्री

कोलकातास्थितेन श्रीनिवासशास्त्रिणा चन्द्रसिंहकुमुदिन्योः प्रणयात्मकमैतिह्यवृत्तमाश्रित्य 'चन्द्रमहीपतिः' इत्यभिधः उपन्यासः प्रणीतः। अस्यैवापरः उपन्यास 'अर्थपिशाच' इति वर्तते।

47. महीधरवेङ्कटशास्त्री

राजमहेन्द्रीस्थितमहीधरवेङ्कटशास्त्रिकृतः 'कल्याणमैत्री' इति शिक्षाप्रधानपुराणाख्यानशैलीमनुसरन् इव उपन्यासः प्रणीतः।

48. सुदर्शनशर्मा

हिमाचलप्रदेशान्तर्गतपरवाणूस्थानवास्तव्येन रचितं 'वीरवैरागिचरितम्' इति उपन्यासकाव्यं प्रणीतम्, यच्च सुबन्ध्वादिकविप्रियां परिपाटीमनुरुणद्धि।

49. प्रो.राधावल्लभत्रिपाठी (15.02.1949)

डॉ.हरिसिंहगौरविश्वविद्यालयस्य भूतपूर्वः संस्कृतविभागाध्यक्षो देहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य भूतपूर्वः कुलपतिः प्रो.राधावल्लभत्रिपाठी उपन्यासत्रयं प्रणिनाय। ते विक्रमचरितम् अन्यच्च अनुभववीथी च सन्ति।

50. डॉ.महेशशर्मा गौतमः (1942)

पटियालावास्तव्यो हिन्दीप्राध्यापकसेवानिवृत्तो पंजाबसाहित्यशिरोमणिपुरस्कारपुरस्कृतो डॉ.महेशशर्मगौतमो युगानुकूलं सशक्तनारीचरितमुपजीव्य 'अरुणा' 'वैशाली' चेति उपन्यासद्वयं प्रणिनाय।

एतेभ्योऽतिरिक्ताः कतिपयेऽन्येऽनूदितोपन्यासकाराः लभ्यन्ते, परं मौलिकग्रन्थाभावादप्रसिद्धत्वाच्च तेषां परिचयो नेह प्रस्तुतः तथापि संस्कृतस्योपन्यासपरम्पराविविधविषया अतीव समृद्धा चास्ति।

**संदर्भ**


1 महाभाष्यम्, पतञ्जलि, 4.3.87
2 तौ शूद्रककथाकारौ वन्द्यौ रामिल सौमिलौ.........।, सूक्तिमुक्तावली, जल्हणः
3 हर्षचरितम्, बाणभट्ट, भूमिका श्लोक - 12-17.
4 बन्धुजीवम्, भूमिका, निवेदनीयं किञ्चित्, पृ. गप
5 स्वातन्त्र्योत्तर संस्कृत उपन्यासों का समीक्षात्मक अध्ययन, डॉ.शशिसिंह पृ. सं. 9-15
6 स्वातन्त्र्योत्तर संस्कृत उपन्यासों का समीक्षात्मक अध्ययन, डॉ.शशिसिंह पृ. सं. 8.
7 संस्कृत वाङ्मय का बृहद् इतिहास, (आधुनिक संस्कृत साहित्य का इतिहास), श्री बलदेव उपाध्याय, सप्तम खण्ड, पृ. 13
8 कथानक-वल्ली, देवर्षि कलानाथ शास्त्री, भूमिका पृ. 7.
9 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 272.
10 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 277.
11 कथानक-वल्ली, देवर्षि कलानाथ शास्त्री, भूमिका पृ. 8.
12 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 296.
13 पं.अम्किादत्तव्यास-एक अध्ययन, डॉ.कृष्ण कुमार, पृ. 12.
14 संस्कृत वाङ्मय कोश, (ग्रन्थकार खण्ड), डॉ.श्रीधरभास्कर वर्णेकर, पृ. 352.
15 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 339.
16 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 347.
17 HISTORY OF CLASSICL SANSKRIT LITERATURE, M. KRISHNAMACHARIAR, P-482
18 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 368.
19 कथानक-वल्ली, देवर्षि कलानाथ शास्त्री - भूमिका पृ. 8.
20 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 371.
21 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 373.
22 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 390.
23 संस्कृत वाङ्मय कोश, डॉ.श्रीधरभास्कर वर्णेकर. पृ. 491.
24 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 397.
25 HISTORY OF CLASSICAL SANSKRIT LITERATURE, KRISHNAMACHARIAR, P.485.
26 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 413.
27 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 415.
28 HISTORY OF CLASSICAL SANSKRIT LITERATURE, KRISHNAMACHARIAR, P.485.
29 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 420.
30 कथानकवल्ली, देवर्षिकलानाथ शास्त्री, भूमिका, पृ. 8
31 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 133
32 जयपुर की संस्कृत परम्परा, देवर्षिकलानाथ शास्त्री पृ. 86.
33 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 432.
34 संस्कृत वाङ्मय कोश, डॉ.श्रीधरभास्कर वर्णेकर. पृ. 387.
35 कथानकवल्ली, देवर्षिकलानाथ शास्त्री, भूमिका, पृ. 8
36 आधुनिक संस्कृत-साहित्य, डॉ.हीरालाल शुक्ल, पृ. 66.3
37 मकरन्दिका, लेखक परिचय, इण्टरनेशनल पब्लिशर्स 1984.
38 संस्कृत वाङ्मय कोश, डॉ.श्रीधरभास्कर वर्णेकर. पृ. 388.
39 सत्यहरिश्चन्द्रोदयम्, कविपरिचयः, पृ. 1.
40 बन्धुजीवम्, भूमिकाभागः, डॉ.शिवप्रसादभारद्वाजः:
41 नवोन्मेषः, सम्पादक-डॉ.रामचन्द्रद्विवेदी, पृ. 133.
42 तपोवनवासिनी, काव्यकर्तुः परिचयः, पृ. 1.
43 स्वातन्त्र्योत्तर संस्कृत उपन्यासों का समीक्षात्मक अध्ययन, डॉ.शशिसिंह, पृ. 31-33.
44 संस्कृतगद्यमञ्जरी, सम्पादक गिरीराजशास्त्री एवं प्यारेमोहन शर्मा, पृ. 56.
45 ENCYCLOPAEDIA OF INDIAN WRITERS , P. NO. 209-210.
46 संस्कृत साहित्य को राजस्थान का योगदान, डॉ.रामदत्त शर्मा, पृ. 52.
47 देवयानी, (नाटक) डॉ.रामकिशोरमिश्र, पृ. 35.
48 संस्कृतगद्यमञ्जरी, सम्पादक गिरीराजशास्त्री एवं प्यारेमोहन शर्मा, पृ. 82.
49 स्वातन्त्र्योत्तर संस्कृत उपन्यासों का समीक्षात्मक अध्ययन, डॉ.शशिसिंह, पृ. 40-41
50 स्वातन्त्र्योत्तर संस्कृत उपन्यासों का समीक्षात्मक अध्ययन, डॉ.शशिसिंह, पृ. 41-42.
51 स्वातन्त्र्योत्तर संस्कृत उपन्यासों का समीक्षात्मक अध्ययन, डॉ.शशिसिंह, पृ. 43-46.
52 बन्धुजीवम्, निवेदनीयं किञ्चित्, पृ. xi
53 बन्धुजीवम्, निवेदनीयं किञ्चित्, पृ. xi-xii.
54 बन्धुजीवम्, निवेदनीयं किञ्चित्, पृ. xi-xii.
55 राधावल्लभ की सारस्वत साधना, डॉ.रमाकान्त पाण्डेय, पृ. 61
56 अरुणा (ग्रन्थकारपरिचयः), डॉ.महेशशर्मा गौतमः

# मस्तिष्कस्य विकृतीनां दूरीकरणार्थं सहायकमस्ति संस्कृतम्

मेरठ। संस्कृतभारत्याः आवासीय संस्कृतप्रशिक्षणवर्गस्य समापन-समारोहः शास्त्रिनगरेस्थित राजवंशगवने अभवत्। समारोहे संस्कृतभाषाया प्रयोगमभवत्। एवं संस्कृतभाषायाः महत्वं विषयेऽपि चर्चा अभवत्।



समारोहे संस्कृतलघुनाटिका एवं गीतश्लोकनायपि प्रस्तुति अभवत्। संस्कृतभारत्याः दशदिवसीय शिविरे मुख्यातिथि आईजीसशस्त्रसीमाबल डॉ. परेशसक्सेना संस्कृतभाषायाः उच्चारणमकरोत्। ते उक्तवन्तः यत् संस्कृतोच्चारणंन् स्मृतिस्तरे वृद्धिर्भवति। अनया मष्तिष्कः क्रियाशीलो भवति। कार्यक्रमाध्यक्ष चौ.चरणसिंह



विश्वविद्यालयस्य कुलपति प्रो. एन.के.तनेजा उक्तवान् यत् इदानीं समये सर्वेऽपि संस्कृतस्य महत्वं विषये ज्ञातवान्। सर्वत्र अस्याः चर्चाऽस्ति। अतः प्राथमिकस्तरे अस्याः अध्ययनस्य व्यवस्था भवितव्याः एवञ्च बीएड इत्यस्यापि पाठ्यक्रमे संस्कृतं भवितव्यम् आरएसएस इत्यस्य क्षेत्रीय संघचालक एवं उपस्थित जनाः संस्कृतस्य महत्वं विषये व्यक्तवन्तः।

# सामान्यजनोऽपि आगच्छन्ति शिविरे संस्कृतभाषायाः अध्ययनार्थम्

मेरठ। कमलादेवीशिशुमन्दिरे संस्कृतभारत्याः आवासीय शिविरे तृतीयदिवसे संस्कृतभाषायाः महत्वं विषये प्रकाशं दत्तवान। एवं शिविरे केचन परिवारः एतादृशोऽस्ति ये संस्कृतस्याध्ययनं कुर्वन्ति। तेषां



लक्ष्यमपि निःशुल्क संस्कृतसेवा। अत्र सर्वेपरिवारेनसह आगत्य संस्कृताध्ययने रुचिः प्रदर्शितवन्तः। बुलंदशहरतः डॉ. मधुलिका, पुत्र भोरशर्मा, हापुड़तः अंजुराणा, पुत्री दीप्ती, हापुड़तः भानुप्रतापः, मेरठतः पूनमआर्या, रूपेशधुलिया, कविताधुलिया, अद्वैतधुलिया, अमित बालियानः, अंजुबालियानः अभ्युदयबालियानः सम्मिलिताः आसन्। मुख्यातिथि डीएनमहाविद्यालयस्य प्राचार्यः डॉ. सुशीलकुमारसिंहः आसीत्। ते उक्तवन्तः यत् संस्कृतभाषायाः अध्ययनं सर्वेषां कृते अनिवार्येऽस्ति येन् ते अन्येषमपि शिक्षयतु। संस्कृतभारतीन्यासस्य सचिव आलोककंसलः आसीत्।

# आचार्यवासुदेवद्विवेदिशास्त्रिपुण्यस्मृतिमहोत्सवः

वाराणसी 26/05/19 संस्कृतजगति सुरभारतीसेवया देदीप्यमानभालानाम् आजीवनं संस्कृतप्रचारं कृतवतां महतामपि महनीयानाम् आचार्यवासुदेवद्विवेदिशास्त्रिणां पञ्चदशपुण्यतिथिमहोत्सवः




इन्दिरागाँधीराष्ट्रियकलाकेन्द्रम्, पार्श्वनाथविद्यापीठपरिसरः,करौंदी, वाराणसी इत्यत्र समायोजितः। आचार्यवासुदेवद्विवेदिशास्त्रिपुण्यस्मृतिसमितिः इन्दिरागाँधीराष्ट्रियकलाकेन्द्र, करौंदी, वाराणसी इत्यनयोः



संयुक्तसहयोगेन राष्ट्रपतिसम्मानसभाजितानां श्रीमतां प्रो.कृष्णकान्तशर्ममहोदयानां संयोजने किञ्च प्रो. धर्मदत्तचतुर्वेदि- डॉ विवेकपाण्डेय- डॉ. शरदिन्दुत्रिपाठि-सन्तोषचतुर्वेदि - डॉ. शैलेशतिवारि- डॉ. अरविन्दतिवारि- श्रीशिवदत्तद्विवेदि- श्रीसचिनतिवारि- श्रीशम्भुतिवारि - श्रीरासविहारि- श्रीसुचीततिवारि प्रभृतिसमर्पितशिष्याणां भावनया ऐषमः महोत्सवो दर्शनीयतां गतः। विद्वत्सम्मानानंतरं कविसमवायः समनुष्ठितः। अवसरेऽस्मिन् अस्य पुस्तकस्य लोकार्पणमभवत्।










अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2018-20 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।